आर्यविमलकीर्तिनिर्देशो नाम महायानसूत्रम्

१. बुद्धक्षेत्रपरिशुद्धिनिदानं नमः सर्वातीतप्रत्युत्पन्नानागतेभ्यो बुद्धबोधि सत्त्वार्यश्रावकप्रत्येकबुद्धेभ्यः ।

एवं मया श्रुतम् एअकस्मिन्समये भगवान्वैशाल्यां विहरति स्म आम्रपालीवने महता भिक्षुसंघेन सार्धं अष्टाभिर्भिक्षुसहस्रैः, सर्वैरर्हद्भिः क्षीणास्रवैर्निःक्लेशैर्वशीभूतैः सुविमुक्तचित्तैः सुविमुक्तप्रज्ञैराजानेयैर्महानागैः कृतकृत्यैः कृतकरणीयैरपहृतभारैरनुप्राप्तस्वकार्थैः परिक्षीणभवसंयोजनैः सम्यगाज्ञासुविमुक्तचित्तैः सर्वचेतोवशितापरमपारमिताप्राप्तैः ।

द्वात्रिंशदा च बोधिसत्त्वसहस्त्रैः सार्धम्
अभिज्ञानाभिज्ञातैर्बोधिसत्त्वैर्महाभिज्ञापरिकर्मनिर्यातैर्बुद्धाधिष्ठानाधिष्ठितैर्धर्मनगरपालैः
सद्धर्मपरिग्राहकैर्महासिंहनादिभिर्दशदिक्षु सुगर्जितनादैरनध्येषितं सर्वसत्त्वानां कल्याणमित्रभूतैस्त्रिरत्नगोत्रानाच्छेद्यकारिभिर्निबृतमारप्रत्यर्थिकैः सर्वपरप्रवाद्यनभिभूतैः स्मृतिबुद्ध्यवबोधसमाधिधारणीप्रतिभानसम्पन्नैः सर्वावरणपर्युत्थानविगतैरनावरणविमोक्ष उपस्थितैरनाच्छेद्यप्रतिभानैर्दानदमनियमसंयमशीलक्षान्तिवीर्यध्यानप्रज्ञोपायकौशल्यप्रणिधानबलज्ञानपार मितानिर्यातैरनुपलब्धिधर्मक्षान्तिसमन्वागतैरवैवर्तिकधर्मचक्रप्रवर्तयद्भिरलक्षणमुद्रामुद्रितैः
सर्वसत्त्वेन्द्रियज्ञानकुशलैः सर्वपर्षदनभिभूतस्य बैशारद्येन बिक्रामिभिर्महापुण्यज्ञानसंभारसंचितवद्भिः सर्वलक्षणानुव्यंजनालंकृतकायैर्वरिष्ठरूपधारिभिश्चालंकारापगतैः सुमेरून्नतशिखर इव यशःकीर्त्यभ्युद्गतैर्वज्रदृढाध्याशयेन बुद्धधर्मसंघेऽभेद्यश्रद्धाप्रतिलब्धैर्धर्मरत्नरश्म्यामृतवृष्टिं सुप्रवर्षयद्भिः सर्वसत्त्वानां शब्दवागंगस्वरशब्दविशुद्ध्युपेतस्वरैर्गम्भीरधर्मप्रतीत्यसमुत्पादे प्रतिपद्यान्तानन्तदृष्टिवासनानां
संधिसमन्तच्छेदैर्निर्भयसिंहसदृशैर्घोषाभिनिर्नादिभिर्महाधर्ममेघस्वरनादिभिः
समविसमधर्मसमतिक्रान्तैर्धर्मरत्नस्य प्रज्ञापुण्यसंभारसमुदागमस्य महासार्थवाहैः; उत्थापनस्य च शान्तसूक्ष्मश्लक्ष्णस्य च दुर्दृशस्य दुरवगाहयस्य धर्मस्य नये विचक्षणैः; सर्वसत्त्वागमनिर्गमसत्त्वाशयगत्यनुप्रवेश ज्ञानविषयसमर्पितैः;
असमसमबुद्धज्ञानेऽभिषेकेणाभिषिक्तैर्दशबल वैशारद्य आवेणिकबुद्धधर्मे(ष्व)
अध्याशयेन प्रतिपन्नैः; सर्वापायभैरवदुर्गति बिनिपातभयस्य परिखाया उत्तीर्य, संचिन्त्य सम्भवस्य गत्युत्पत्तिदेशिकैर्महावैद्यराजैः सर्वसत्त्वविनयस्य विधिविद्वद्भिः सर्वसत्त्वानां सर्वक्लेशरोगावबोधैः; यथायोगं धर्मभैषज्ययुक्तिसुप्रयुक्तवद्भिर्गुणानन्ताकरसमर्पितैरनन्तबुद्धक्षेत्राणि गुणव्यूहेन स्वालंकृतवद्भिरमोघदर्शनश्रवणैरबन्ध्यपादोत्सर्गैः; कोटिनयुतशतसहस्राप्रमेयकल्पे(ष्व)पि गुणान्परिवर्णयेत्, गुणौघोऽनन्तोऽधिगतः । तद्यथा

समदर्शिनाम बोधिसत्त्वेन च समासमदर्शिना च समाधिविकुर्वितराजेन च धर्मेश्वरेण च धर्मकेतुना च प्रभाकेतुना च प्रभाव्यूहेन च रत्नव्यूहेन च महाव्यूहेन च प्रतिभानकूटेन च रत्नकूटेन च रत्नपाणिना च

रत्नमुद्राहस्तेन च नित्यप्रलम्बहस्तेन च नित्योत्क्षिप्तहस्तेन च नित्यतपसा च नित्यनन्दहासेन्द्रियेण च प्रामोद्यराजेन च देवराजेन च प्रणिधानव्यसनानुप्राप्तेन प्रतिसंवित्प्रसाधनप्राप्तेन च गगनगंजेन च रत्नप्रदीपधरेण च रत्नवीरेण च रत्ननन्दिना च रत्नश्रिया चेन्द्रजालेन च जालिनीप्रभेण चानुपलब्धिध्यानेन च प्रज्ञाकूटेन च रत्नमुक्तेन च मारहन्त्रा च विद्युद्देवेन च बिकुर्वणराजेन च निमित्तकूटसमतिक्रान्तेन च सिंहगर्जिताभ्यवघोषणस्वरेण च गिर्यग्रसमुद्घातराजेन च गन्धहस्तिना च गन्धकुंजरनागेन च नित्योद्युक्तेन चानिक्षिप्तधुरेण च प्रमतिना च सुन्दरजातेन च पद्मश्रीगर्भेण पद्मव्यूहेन चावलोकितेश्वरेण च महास्थामप्राप्तेन च ब्रह्ममजालकेन च रत्नश्वेतासनेन च मारजिता च समक्षेत्रालङ्कारेण च मणिरत्नच्छत्रेण च मणिचूडेन च मैत्रेयेण च मञ्जुश्रीकुमारभूतेन च तैरित्यादिभिर्द्वात्रिंशदा बोधिसत्त्वसहस्रैः (सार्धम्)

चतुष्क महाद्विपाशोक(नाम)नामलोकधातोर्ब्रह्मशिख्यादयो दशसहस्रं ब्रह्मणां भगवतो दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय चागताः । तेऽपि तस्यां पर्षद्येव संनिपतिताः । नानाचतुष्कमहाद्वीप्(एभ्यो)ऽपि द्वादशसहस्रं शक्राणां आगतं । तेऽपि तस्यां पर्षद्येव संनिपतिताअः । एवं अन्यच्च महेशाख्यमहेशाख्या ब्रह्मा कौशिकश्च लोकपालदेवनागयक्षगन्धर्वासुरगरूडकिन्नरमहोरगा अपि तस्यां पर्षद्येव संनिपतिता अभूवन् । एवमेव चतुष्परिषद्भिक्षुभिक्षुण्युपासकोपासिका अपि तत्र संनिपतिता आसुः ।

अथ भगवांश्रीगर्भे सिंहासने निषण्णोऽनेकशतसहस्रपर्षदा परिवृतः पुरस्कृतो धर्म देशयति स्म । सुमेरूरिव पर्वतराजः समुद्राभ्युद्गतः सर्वाः पर्षदोऽभिभूय भासते तपति विरोचते स्म श्रीगर्भे सिहासने निषण्णः ।

ततो लिच्छविकुमारो रत्नाकरो बोधिसत्वो लिच्छविकुमाराणां पञ्चशतमात्रञ्च सप्तरत्नच्छत्रं समादाय, वैशाल्या महानगर्या निश्वर्य, येनाम्रपालीवनंच येन भववांस्तेनोपसंक्रान्ताअः । उपसंक्रम्य भगवतः पादयोअः शिरसा वन्दित्वा, भगवति सप्तकृत्वः प्रदक्षिणीकृत्य ते रत्नच्छत्रं यथा धारिणो भगवन्तं अभित्रायन्ते स्म । अभिपालयित्वैकान्ते स्थुअः ।

तानि निर्यातितानि रत्नच्छत्राणि समनन्तरं सद्यो बुद्धानुभावेनैकीभूत्वा, तेन रत्नच्छत्रेणायं सर्वत्रिसाहस्रमहासाहस्रलोकधातुअः संछादितः प्रतिभाति स्म । स त्रिसाहस्रमहासाहस्रलोकधातुपरिणाहश्व तस्यैव महारत्नच्छत्रस्य मध्ये प्रभासितो(ऽभूत्) (ये)ऽस्मिन्त्रिसाहस्रमहासाहस्रलोकधातौ केचन(पर्वताः) स्युअः सुमेरुः पर्वतराजश्व हिमवन्तपर्वतश्च मुचिलिन्दपर्वतश्व महामुचिलिन्द पर्वतश्च गन्धमादनश्च रत्नपर्वतच्च कालपर्वतश्च चक्रवाडश्च महाचक्रवाडश्च सर्वे तेऽपि तस्यैव महारत्नच्छत्रस्य मध्ये प्रभासिता(अभूवन्) । यदस्मिन्त्रिसाहस्रमहासाहस्रलोकधातौ किंचिज्(जल) स्यात्महासमुद्रसरस्तडागपुष्करणीनदीकुनदीपल्वलनिम्नं सर्वं तदपि तस्यैव महारत्नच्छत्रस्य मध्ये प्रभासितं (अभूत्) । अस्मिन्त्रिसाहस्रमहासाहस्रलोकधातावादित्यचन्द्रविमानाश्व तारकारूपाणि देवभवनानि च नागपुराणि च यक्षगन्धर्वासुरगरुडकिंनरमहोरगावासाश्व चतुर्महाराजप्रासादाश्व ग्रामनगरनिगमराष्ट्रराजधान्यो यावतकाः स्युः; सर्वास्ता अपि तस्यैवैकाकिनो महारत्नच्छत्रस्याभासं

गच्छन्ति स्म । दशदिग्लोके भगवतां बुद्धानां या धर्मदेशनोत्पन्ना, सापि तस्मादेकाकिनो महारत्नछत्रान्निर्गते स्वरे नदति स्म ।

अथ भगवतोऽस्मिनेवं रूपे महाप्रातिहार्ये दृष्टे, सा सर्वावती पर्षदाश्चर्यप्राप्ताभूत् । तुष्टोदग्रात्तमनाः प्रमुदिता प्रीतिसौमनस्यजाता तथागतं अभिवन्द्यानिमिषाभ्यां नेत्राभ्यां पश्यत्यस्थात् ।

ततो रत्नाकरो लिच्छविकुमारो भगवत इदं एवं रूपं महाप्रातिहार्य दृष्ट्वा, दक्षिणं जानुमण्डलं पृथिव्यां प्रतिष्ठाप्य, येन भगवांस्तेनांजलिं प्रणम्य, भगवन्तं आभिर्गाथाभिरभ्यनन्दत्

"विशालनेत्र शुद्धरुचिरपद्मदलवत् । शुभाभिप्राय शमथपारगत परमप्राप्त । । कुशलकर्माचितवनप्रमेयगुणसागर । नमस्तुभ्यं श्रमणाय शान्तिमार्गसंनिश्रिताय । । पुरुषवृषभस्य यूयन्नायकस्यर्द्धिविधिं पश्यत । सुगतस्य सर्वाण्यपि क्षेत्राणि प्रवरव्यक्तानि दृश्यन्ते । । तव धर्मकथोदारामृतगा । तानि सर्वाण्यस्मिन्गगनतले दृश्यन्ते । । तवोत्तमधर्मराज्यं इदम्, धर्मराज । जिनेन च जगद्भयो धर्मधनं प्रदलितं । । धर्मप्रभेदनविज्ञाय परमार्थसंदर्शकाय । धर्मेश्वराय धर्मराजाय तुभ्यं शिरसा नमः । ।sअस्तिनास्त्य पगताः सर्व इमे धर्मा हेतून्प्रतीत्यसमुत्पन्नाः । एष्वात्मवेदककारका न सन्ति । कुशलपापकर्म किंचिदविप्रणाशम्s इति वचनेनोपदर्शयसि । । त्वया मुनीन्द्र, मारातिबलबलं संजित्य । परमप्रशान्तबोध्यमरणक्षेमं प्राप्तं । । तत्तत्र निर्वेदनचित्तमनोऽप्रचारैअः ।
सर्वतीर्थिककुगणैरज्ञातं । । अद्भुतं धर्मराजदेवमनुष्याणामभिमुखं । त्रिपरिवर्त बहवाकारं प्रशान्तस्वभावविशुद्धं धर्मचक्रं प्रवर्तयसि । तदनन्तरं त्रिरत्नं उपदिश्यते । । ये धर्मरत्नेन सुविनीताः । तेऽवितर्का नित्यप्रशान्ताः । । त्वं हि जातिजरामरणान्तगो वैद्यो वरः । अप्रमेयगुणसागराय शिरसा नमः । ।
सत्कारसुकृतैस्सुमेरुरिवाप्रकम्प्यः । शीलवत्सु च दुःशीलेषु च समं मैत्री । । समतासंप्रस्थितो मनश्वाकाशवत् । अस्मै सत्त्वरत्नाय कुर्यात्पूजान्न कः?
महामुने इमा हि पर्षदः संनिपतिताः । तव मुखं सुप्रसादमनसा प्रेक्षन्ते । । सर्वैरपि जिनः स्वाभिमुखे दृष्टः । तद्ध्रुवं जिनस्यावेणिकबुद्धलक्षणं । । भगवत एकवाक्प्रवर्तिता, परं तु (सा) । पर्षद्भिर्नानावाक्षु विज्ञायते । । विज्ञायते सर्वजगता स्वकार्थो यथा । तद्ध्रुवं जिनस्यावेणिकबुद्धलक्षणं । । तेनैकवाक्स्ववघोषणकार्येण । केचित्वासनापरिभाविताः केचित्प्रतिपन्नः । । (या) विमत्याकांक्षाः, ता नायकः प्रतिप्रस्रम्भयति म । तद्ध्रुवं जिनस्यावेणिकबुद्धलक्षणं । । दशबलनायकविक्रामिणे तुभ्यं नमः । नमस्तेऽभयाय भयविप्रमुक्ताय । । आवेणिकधर्मानवस्यं सुप्रतिपन्नाय । सर्वजगन्नेत्रे तुभ्यं नमः । नमः सर्वसंयोजनबन्धनच्छेदकाय । । पारगताय स्थलस्थिताय नमः । खिन्नजगत्तारकाय तुभ्यं नमः । नमः संसारप्रबृत्त्यां अप्रतिष्ठिताय । । सत्त्वगतिसंप्रस्थितः सर्वसहचरः । परं तु (ते) सर्वगतिविमुक्तमनः । । परिशुद्धपद्ममुदके जातमुदकेन पर्यनुपलिप्तं । मुनिपद्मेन शून्यता भाविता ध्रुवं । । सर्वाकारनिमित्तानि संप्रवान्तानि । त्वं कस्मिंश्चित्प्रणिधानकारी नासि । । परिशुद्धस्य बुद्धस्य महानुभावोऽचिन्त्यः । आकाशसदृशं अप्रतिष्ठितं वन्दाम्यहम्" । ।

अथ भगवन्तं ताभिर्गाथाभिरभिनन्द्य, रत्नाकरेण लिच्छविकुमारेण भगवन्तं एवमुक्तम् "भगवन्, एभ्यो लिच्छविकुमारेभ्यः पंचशतमात्रेभ्यः सर्वेभ्योऽनुत्तरसम्यक्संबोध्यां संप्रतिपन्नेभ्योऽबोधिसत्त्वानां परिशुद्धं बुद्धक्षेत्रं किम्ऽ इति परिशुद्धं बुद्धक्षेत्रं पृच्छद्भ्यो भगवता तथागतेनैभ्यो बोधिसत्त्वेभ्यः परिशुद्धं बुद्धक्षेत्रं सूक्तं देशितं स्यात् ।

एवमुक्ते, भगवान्रत्नाकराय लिच्छविकुमाराय साधुकारं अदात् "साधु साधु कुमार । साधु (यथा) त्वं परिशुद्दं बुद्धक्षेत्रं आरभ्य, तथागतं पृच्छसि । तेन हि कुमार त्वं शृणु साधु च सुष्ठु च मनसि कुरु । बोधिसत्त्वानां परिशुद्धं बुद्ध क्षेत्रं आरभ्य भाषिष्येहं ते" । "साधु भगवन्" । इत्युक्त्वा लिच्छविकुमारो रत्नाकरश्व पंचमात्राणि लिच्छविकुमारशतानि भगवते प्रत्यश्रौषुअः ।

भगवांस्तानेवं आमन्त्रयते स्म "कुलपुत्र (।), सत्त्वक्षेत्रः हि बोधिसत्त्वस्य बुद्धक्षेत्रं । तत्कस्य हेतोअः? यावद्बोधिसत्त्वः सत्त्वानुपबृंहयति तावद्बुद्धक्षेत्रस्य परिग्राहकः । ईदृशस्य बुद्धक्षेत्रस्य परिग्राहको यथा सत्त्वा विनीता भवन्ति । बुद्धक्षेत्रप्रवेशं यथा सत्त्वा बुद्धज्ञानप्रवेशं गच्छन्त्येवं रूपं बुद्धक्षेत्रं परिगृह्णाति । एवं रुपं बुद्धक्षेत्रं परिगृह्णाति यथा बुद्धक्षेत्रप्रवेशम् आर्यजातेन्द्रियोत्पादं सत्त्वा गच्छन्ति । तत्कस्य हेतोः? कुलपुत्राः, बोधिसत्त्वानां बुद्धक्षेत्रं हि सत्त्वार्थक्रियोत्पत्तिहेतोअः । रत्नाकर, तद्यथा आकाशसमे किचित्कर्तुकामस्तथा कुर्यात्किंचाप्याकाशे हि करणे चालंकारे च तथा न युज्यते । रत्नाकर सर्वधर्मानाकाशमान्ज्ञात्वा, बोधिसत्वो यथा सत्त्वपरिपाचनार्थाय बुद्धक्षेत्रं कर्तुकामस्तथा बुद्धक्षेत्रं कुर्यात्किंचापि बुद्धक्षेत्रं आकाशे हि करणे न युज्यते, अलंकारे न युज्यते ।

"रत्नाकर, अथ चाशयक्षेत्रं हि बिधिसत्त्वस्य बुद्धक्षेत्रं; तद्बोधिप्राप्तिबुद्धक्षेत्रे शाठ्यमायापगताः सत्त्वा उपपत्स्यन्ते । कुलपुत्र, अध्याशयक्षेत्रं हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तद्बोधिप्राप्तिबुद्धक्षेत्रे सर्वकुशलमूलसंभारोपचितवन्तः सत्त्वा उपपत्स्यन्ते । प्रयोगक्षेत्रं हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तद्बोधिप्राप्तिबुद्धक्षेत्रे सर्वकुशलधर्मोपस्थिताः सत्त्वा उपपत्स्यन्ते । बोधिसत्त्वस्योदारचित्तोत्पादो बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिस्तद्बोधिप्राप्तिबुद्धक्षेत्रे महायानांप्रस्थिताः सत्त्वा उपपत्स्यन्ते । दानक्षेत्रं हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिंस्तद्बोधिप्राप्तिबुद्धक्षेत्रे सर्वस्वपरित्यागिनस्सत्त्वा उपपत्स्यन्ते । शीलक्षेत्रं हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिस्तद्बोधिप्राप्तिबुद्धक्षेत्र सर्वाशयसहगता दशकुशलकर्मपथपरिरक्षन्तः सत्त्वा उपपत्स्यन्ते । क्षान्तिक्षेत्रं हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिंस्तद्बोधिप्राप्तिबुद्धक्षेत्रे द्वात्रिंशल्लक्षणलंकृताः क्षान्तिदमपरमशमथपारमिताः सत्त्वा उपपत्स्यन्ते । वीर्यक्षेत्रं हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिस्तद्बोधिप्राप्तिबुद्धक्षेत्रे सर्वकुशलधर्मेष्वारब्धवीर्याः सत्त्वा उपपत्स्यन्ते । ध्यानक्षेत्रं हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिस्तद्बोधिप्राप्तिबुद्धक्षेत्रे स्मृतिसंप्रजन्यसमाहिताः सत्त्वा उपत्स्यन्ते; प्रज्ञाक्षेत्रं हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिंस्तद्बोधिप्राप्तिबुद्धक्षेत्रे सम्यक्त्वनियतसत्त्वा उपपत्स्यन्ते । चत्वार्यप्रमाणानि हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिंस्तद्बोधिप्राप्तिबुद्धक्षेत्रे
मैत्रीकरुणामुदितोपेक्षाविहारिणस्सत्त्वा उपपत्स्यन्ते । चत्वारि संग्रहवस्तूनि हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिंस्तद्बोधिप्राप्तिबुद्धक्षेत्रे सर्वविमुक्तिपरिगृहीताः सत्त्वा उपपत्स्यन्ते । उपायकौशल्यं हि

बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिंस्तद्बोधिप्राप्तिबुद्धक्षेत्रे सर्वोपायचर्याविचक्षणाः सत्त्वा उपपत्स्यन्ते । सप्तत्रिंशद्बोधिपक्ष्यधर्मा हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिस्तद्बोधिप्राप्तिबुद्धक्षेत्रे स्मृत्युपस्थानसम्यक्प्रधानर्द्धिपादेन्द्रियबलबोध्यंगमार्गप्रतिपत्तिज्ञाः सत्त्वाउपपत्स्यन्ते । परिणामना चित्तं हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तद्बोधिप्राप्तिबुद्धक्षेत्रे सर्वगुणालंकारा आविर्भवन्ति । अष्टाक्षणप्रशान्त्युपदेशो हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तद्बोधिप्राप्तिबुद्धक्षेत्रे सर्वापाया अत्यन्तसमुच्छिन्नाः; अष्टाक्षणा अपगता भवन्ति । प्रत्यात्मशिक्षापदस्थितिश्व परस्यापच्यनालापो हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिंस्तद्बोधिप्राप्तिबुद्धक्षेत्र आपत्तिशब्दोऽपि तु न नद्यते । दशकुशलकर्मपथपरिशुद्धिर्हि बोधिसत्त्वस्य बुद्धक्षेत्रं; तस्मिंस्तद्बोधिप्राप्तिबुद्धक्षेत्रे ध्रुवायुर्महाभोगब्रह्मचर्यसत्यानुवर्तनवचनालंकार मञ्जुवाक्याभेद्यपर्षन्निर्भिन्निनिवेशनकौशल्येर्ष्या विप्रयोगाव्यापादचित्तसम्यग्दृष्टिसमन्वागताः सत्त्वा उपपत्स्यन्ते ।

"एवं, हि कुलपुत्र, यादृशो बोधिसत्त्वस्य बोधिचित्तोत्पादस्तादृशोऽप्याशयः । यादृश आशयस्तादृशोऽपि प्रयोगः । यावत्प्रयोगस्तावच्चाध्याशयः । तावदध्याशयस्तावच्च निध्यप्तिअः । यावन्निध्यप्तिअतावच्च प्रतिपत्तिअः । यावत्प्रतिपत्तिस्तावच्च परिणामना । यावत्परिणामना तावच्चोपायाः । यावदुपायास्तावच्च परिशुद्धक्षेत्रं । यथा परिशुद्धक्षेत्रम्, परिशुद्धसत्त्वास्तथा । यथा परिशुद्धसत्त्वास्तथापि परिशुद्धज्ञानं । परिशुद्धज्ञानं यथा, तथापि परिशुद्धशासनं । यथा परिशुद्धशासनं, तथा च परिशुद्धज्ञानसाधनं परिशुद्धज्ञानसाधनं यथा, तथा पुनः परिशुद्धस्वचित्तं ।

ः तस्मात्, कुलपुत्र, बोधिसत्त्वेन बुद्धक्षेत्रपरिशुद्धनिश्विकीर्षया स्वचित्तपर्यवदापनाय प्रयत्तव्यं । तत्कस्य हेतोः? यथा बोधिसत्त्वस्य चित्तं परिशुद्धम्, तादृशे बुद्धक्षेत्रं परिशुद्धं भवति" ।

ततो बुद्धानुभावेनायुष्मतः शारिपुत्रस्यैतदभूत्ऽयदि यथा चित्तं परिशुद्धम्, तादृशे बोधिसत्त्वस्य बुद्धक्षेत्रं परिशुद्धं भवेत्, भगवतः शाक्यमुनेर्बोधिसत्त्वचर्या चरतः, तस्य चित्तन्न परिशुद्धं किम्, यथा बुद्धक्षेत्रं एवं रुपं परिशुद्धन्न दृश्यतेऽ? तस्यैतदभूत् ।

अथ भगवानायुष्मतः शारिपुत्रस्य चेतसैव चेतः परिवितर्कं आज्ञायायुष्मन्तं शारिपुत्रमेतदवोचत् "शारिपुत्र, तत्किं मन्यसे? सूर्यश्व चन्द्रः किन्न परिशुद्धौ, यथा जात्यन्धैर्न दृश्येते?" अब्रवीत् "नो हीदं, भगवन् । तैर्जात्यन्धैर्दुष्कृतम्, न तु सूर्येण च चन्द्रेण हि दुष्कृतम्" । अवोचत् "तथा हि, शारिपुत्र, केनचित्सत्त्वेन तथागतस्य बुद्धक्षेत्रगुणालङ्कारव्यूहो न दृश्यते, स सत्त्वाज्ञानेन हि दोषः, न तु तथागतेन तस्मिन्दोषः । तथागतस्य बुद्धक्षेत्रं हि परिशुद्धम्, किं तु त्वया तन्न दृश्यते" ।

ततो ब्रह्मा शिख्यायुष्मन्तं शारिपुत्रमेवमब्रवीत् "भदन्त शारिपुत्र, तथागतस्य बुद्धक्षेत्रन्न परिशुद्धम्ऽ इति मा ब्रवीः । भदन्त शारिपुत्र, परिशुद्धं भगवतो बुद्धक्षेत्रम्; तद्यथा परनिर्मितवशर्तिदेवानाम्, भदन्त शारिपुत्र, आवासव्यूहो यथा, भगवतः शाक्यमुनेर्बुद्धक्षेत्रव्यूहोऽपि मयेदृशो दृश्यते"

ततः शारिपुत्रः स्थविरो ब्रह्माणं शिखिनमेवमब्रवीत् । "ब्रह्मन्, अहं त्विमां महापृथिवीमुत्कूलनिकूलकण्टकप्रपातशिखरश्वभ्रगूथोडिगल्ल प्राकीर्णां पश्यामि" ।

ब्रह्मा शिख्यब्रवीत "तथा हीदृशं बुद्धक्षेत्रं परिशुद्धन्न दृश्यते । भदन्त शारिपुत्र, उत्कूले निकूले चित्ते बुद्धज्ञानायाशयो नियतमपरिशुद्धः । येभ्यः केभ्यश्वित्, भदन्त शारिपुत्र, सत्त्वेषु समचित्तता च बुद्धज्ञानायाशयः परिशुद्धस्तैर्हीदं बुद्धक्षेत्रं परिशुद्धं दृश्यते" ।

अथ भगवानिमं त्रिसाहस्रमहासाहस्रलोकधातुं पादाङ्गुष्ठेनाहन्ति स्म । समनन्तरहतोऽयं लोकधातुरनेकरत्नकूटमनेकरत्नशतसहस्रसंभारोऽनेकरत्नशतसहस्रप्रतिव्यूहो भूतस्तद्यथा रत्नव्यूहस्य तथागतस्यानन्तगुणरत्नव्यूहो लोकधातुरिव, अयं च लोकधातुस्तादृशः । ततः सापि सर्वावती परिषदाश्वर्यप्राप्ता रत्नपद्मव्यूहासन आत्मानमपि च निषण्णां चिन्तां करोति स्म ।

अथ भगवानायुष्मन्तं शारिपुत्रमवोचत् "ननु त्वं, शारिपुत्र, इमं बुद्धक्षेत्रगुणव्यूहं पश्यसि?" अब्रवीत् "ध्रुवं पश्यामि, भगवन् । सन्दृश्यन्त इमेऽदृष्टाश्रुतपूर्वा व्यूहाः" । अभाषत "शारिपुत्र, इदं हि बुद्धक्षेत्रन्नित्यमीदृशम्, कि तु हीनसत्त्वपरिपाचनार्थाय तथागतो बुद्धक्षेत्रेमेवं बहुदोषदुष्टं देशयति । शारिपुत्र, तद्यथापि नाम देवपुत्रा एकस्मिन्नत्नभाजने भोजनं भक्षन्ति, अपि तु यथा पुण्यसंनिचयभेदेन दिव्याहारामृतप्रत्युपस्थिताः, एवमेव, शारिपुत्र, सत्त्वा एकस्मिन्बुद्धक्षेत्र उत्पन्ना यथापरिशुद्धिर्बुद्धानां बुद्धक्षेत्रगुणव्यूहं पश्यन्ति" ।

अस्मिन्बुद्धक्षेत्रगुणालङ्कारव्यूहे दृश्यमाने, चतुरशीत्या प्राणिसहस्रै रनुत्तरसम्यक्सम्बोधिचित्तान्युत्पादितान्यभूवन् । ये केचन लिच्छविकुमाराणां पञ्चशतं लिच्छविकुमारेण सार्धमुपसंक्रान्ताः तेऽप्यानुलोमिकीं क्षान्तिं प्राप्नुवन् ।

अथ भगवांस्ता ऋद्विविधीअः पिंडयति स्म; ततश्व तद्बुद्धक्षेत्रं भूयः पूर्वस्वभावमापन्नं दृश्यते स्म ।

तत्र श्रावकयानिदेवमनुष्याणामेतदभूत्ऽअनित्या वत संस्काराःऽ । विदित्वेति द्वांत्रिशदे प्राणिसहस्रेभ्यः सर्वधर्मेषु विरजो विगतमलं विशुद्धं धर्मचक्षुः; अष्टाभ्यो भिक्षुसहस्रेभ्योऽनुपादायाश्रवेभ्यश्चित्तानि विमुक्तान्यभूवन् । चतुशीत्यापि बुद्धक्षेत्रोदाराधिमुक्तिकप्राणिसहस्रैः, सर्वधर्मान्विठपनप्रत्युस्थानलक्षणान्विदित्वा, अनुत्तरसभ्यक्सम्बोधिचित्तान्युत्पादितानि ।

बुद्धक्षेत्रपरिशुद्धिनिदानस्यपरिवर्तः प्रथमः ।

२. अचिन्त्योपायकौशल्यम्

अपि च तेन कालेन वैशाल्याम्महानगर्यां एको विमलकीर्तिर्नाम लिच्छविरासीत्, पूर्वजिनकृताधिकारोऽवरोपितकुशलमूलोऽनेकबुद्धपर्युपासितः क्षान्तिप्रतिलब्धः प्रतिभानलब्धो

महाभिज्ञाविक्रीडितो धारणीप्रतिलब्धो वैशारद्यप्राप्तो निहतमारप्रत्यर्थिको गम्भीरधर्मनेत्री सुप्रतिपन्नः प्रज्ञापारमिता निर्यात उपायकौशल्यगतिंगतः प्रतिभानवत्सत्त्वाशयचर्याविज्ञः सत्त्वेन्द्रियवरावरज्ञाननिर्यातो यथाप्रत्यर्हं धर्मशास्ता । अस्मिन्महायाने प्रयत्य, ज्ञातः सुनिश्चितः कर्मकरो बुद्धस्येर्यापथे विहारी परमबुद्धिसागरानुगतः सर्वबुद्धैः संस्तुतः स्तोभितः प्रशंसितः सर्वशक्रब्रह्मलोकपालनमस्कृतः सः ।

उपायकौशल्येन सत्त्वपरिपाचनार्थाय वैशाल्याम्महानगर्या विहरन्, (सो)ऽनाथदरिद्रसत्त्वसंग्रहायाक्षयभोगः । दुःशीलसत्त्वसंग्रहाय परिशुद्धशीलः । द्विष्टातिद्विष्टव्यापादि दुअःशीलक्रोधनसत्त्वसंग्रहाय क्षान्तिदमप्राप्तः । अलससत्त्वसंग्रहायोत्तप्तवीर्यः । विक्षिप्तचित्तसत्त्वसंग्रहाय ध्यानस्मृतिसमाधिविहारी । दौष्प्रज्ञसत्त्वसंग्रहाय प्रज्ञाविनिश्चयलाभी । यद्यप्यवदातवस्त्रपरिवेष्टिताः (स) श्रमणचरित सम्पन्नः । गृहावासे यद्यपि विहरन्, कामरूपारूपधात्वसंसृष्टः । पुत्रदारान्तःपुरेऽपि नित्यं ब्रह्मचारी । परिवारपरिवृतो यद्यपि दृश्यमानः प्रविवेकचारी । भूषणालंकृतो दृश्यमानः, किं तु लक्षणोपेतः । यद्यप्याहारपानभोजनं दृश्यमानो भुञ्जन्, सदा ध्यानस्य प्रीतिभोजनं परिभुङ्क्ते स्म । सर्वक्रीडाद्यूतकोणेषु दृश्यमानोऽपि, क्रीडाद्यूतरक्तान्सत्त्वान्परिपाचयति स्म नित्यममोघचारी । सर्वपाषण्डिकान्यद्यपि गवेषी, बुद्धेऽभेद्याभिप्रायसम्पन्नः । लौकिकलोकोत्तरमन्त्रशास्त्रविज्ञानोऽपि सदा धर्मसम्मोदनन्दाधिमुक्तः । संसर्गसमन्तमध्ये दृश्यमानोऽपि, सर्वमध्ये प्रमुखः पूजितः ।

लोकसामग्रीकरणार्थाय ज्येष्ठमध्यकुमाराणां सहायीभावं गच्छति स्म धर्मभाणकः । सर्वव्यवहारप्रतिपन्नो यद्यपि, लाभभोगनिराकाङ्क्षः । सत्त्वधर्षणार्थाय सर्वपथचत्वरशृङ्गाटकेषु दृश्यमानोऽपि, सत्त्वरक्षणार्थाय राजकार्येषु च प्रयुक्तः । हीनयानाधिमुक्तिवारणाथार्य महायाने च सत्त्वपरिग्रहार्थाय सर्वधर्मश्रवणिकसंवाचकेषु दृश्यते स्म । बालपरिपाचनार्थाय सर्वलिपिशालागाम्यपि । कामादीनवसम्प्रकाशनार्थाय गणिकागाराण्यपि सर्वत्रावक्रामी । स्मृतिसम्प्रतिष्ठापनार्थाय सर्वमद्यविक्रयगृहाणि चावक्रमति स्म ।

धर्मश्रेष्ठोपदेशकारणाच्छ्रेष्ठ्यन्तरेऽपि श्रेष्ठिसम्मतीयः । सर्वग्राहकादानपरिच्छेदकारणाद्गृहपत्यन्तरे च गृहपतिसम्मतीयः । क्षान्तिसौरत्यबलप्रतिष्ठापनकारणात्क्षत्रियान्तरे क्षत्रियसम्मतीयः । मानमददर्पप्रणाशनकारणाद्ब्राह्मणान्तरेऽपि ब्राह्मणसम्मतीयः । सर्वराजकार्यधर्मानुरूपाज्ञाकारणादमात्यान्तरे चामात्यसम्मतीयः । राजभोगैश्वर्यसङ्गविवर्तनकारणात्कुमारान्तरे च कुमारसम्मतीयः । कुमारीपरिपाचनकारणादन्तःपुरेऽपि कञ्चुकिसम्मतीयः ।

प्राकृतस्य पुण्यं विशेषेणाध्यालम्बनतो जनकायेन सार्धं सामग्रीमापन्नः । ईश्वराधिपतय उपदेशकारणाच्छक्रान्तरे च शक्रसम्मतीयः । ज्ञानविशेषशासनकारणाद्ब्रह्मान्तरेऽपि ब्रह्मसम्मतीयः । सर्वसत्त्वपरिपाचनाल्(लोकपालेषु) लोकपालसम्मतीयः । तथा हि लिच्छविर्विमलकीर्तिरप्रमाणोपायकौशल्यज्ञानसम्पन्नो वैशाल्याम्महानगर्यां विहरति स्म ।

स उपायकौशल्येनात्मानं ग्लाननिभं देशयित्वा, तस्य रोगप्रश्नार्थाय वैशाल्या महानगर्या राजामात्यधिपकुमारमण्डलब्राह्मणगृहपतिश्रेष्ठिनैगमजानपदाः, नो हीदं प्राणिनां बहुसहस्रं रोगपृच्छनायागतं । तेभ्यस्तत्र समागतेभ्यो लिच्छविर्विमलकीर्तिरिममेव चतुर्महाभूतकायं आरभ्य, धर्मं देशयति स्म

"मित्राः, अयं हि काय एवमनित्य एवमध्रुवोऽनाश्वासः । (स ह्य्) एवं दुर्बलोऽसारस्तथा हि लुप्तः परीत्तकालो दुःखो बहुरोगो विपरिणामधर्मः । मित्राः, तथा ह्यस्मिन्काये बहुरोगभाजने हि तस्मिन्पण्डितोऽसंवासिकः ।

"मित्राः, अयं कायो धारणन् न क्षममाणः फेनपिण्डोपमः । अयं हि कायोऽचिरस्थितिको बुद्बुदोपमः । अयं कायः क्लेशतृष्णोत्पन्नो मरीच्युपमः । असारोऽयं कायः कदलीस्तम्भोपमः । अस्थिरस्नायुबन्धो वतायं यन्त्रोपमः । अयं कायो हि विपर्यासोत्पन्नो मायोपमः । अभूतदर्शनं ह्ययं कायस्स्वप्नोपमः । प्रतिबिम्बोपमोऽयं कायः पूर्वकर्मप्रतिबिम्बो दृश्यमानः । अयं कायः प्रत्ययाधीनः, प्रतिश्रुत्कोपमस्तत् । विक्षिप्तचित्तो (यथा) ह्ययं कायः पतनलक्षणो मेघोपमः । अयं कायः क्षणविनाशनसहगतश्चानवस्थितो विद्युत्तुल्यः । अस्वामिकोऽयं हि कायो नानाप्रत्ययोत्पन्नः ।

"निर्व्यापारो ह्यं कायः पृथिवीसदृशः । आपसदृशोऽयं कायोऽनात्मकः । अयं कायस्तेजस्सदृशो निर्जीवः । अयं कायो वायुसदृशो निष्पुद्गलः । आकाशसदृशोऽयं कायो निःस्वभावः ।

"अयं कायो महाभूतस्थानोऽभूतः । आत्मात्मीयरहितोऽयं कायः शून्यः । तृणकाष्ठाभित्तिलोष्टप्रतिभासोपमोऽयं कायो जडः । अयं हि कायो वातयन्त्रसमन्वागमेन (यथ्)ओत्पन्नो वेदनारहितः । अयं हि पूयमीढसंचितः कायस्तुच्छः । नित्यलेपपरिमर्दनभेदनविध्वंसनधर्मोऽयं कायो रिक्तः । अयं हि कायश्चतुरधिकचतुःशतरोगोपद्रुतः । सदा जराभिभूतो ह्ययं कायो जरोदपानसदृशः । मरणान्तोऽयं कायोऽन्तानिश्रितः । अयं हि कायः स्कन्धधात्वायतनपरिगृहीतो वधकाशिविषशून्यग्रामोपमः । तस्मिन्युष्माभिरेवंकाये निर्विदुद्वेगयोरुत्पादितयोस्तथागतकायाधिमुक्तिरुत्पादयितव्या ।

"मित्राः, तथागतकायो हि धर्मकायो ज्ञानजः । तथागतकायः पुण्यजो दानजश्शीलजस्समाधिजः प्रज्ञाजो विमुक्तिजो विमुक्तिज्ञानदर्शनजो मैत्रीकरुणामुदितोपेक्षोत्पन्नोदानदमसंयमोत्पन्नो दशकुशलकर्मपथजः क्षान्तिसौरत्यजस्थिरवीर्यकुशलमूलजो
ध्यानविमोक्षसमाधिसमापत्तिजश्श्रुतप्रज्ञोपायजस्सप्तत्रिंशद्बोधिपाक्षिकधर्मजश्शमथविपश्यनाजो
दशबलजश्चतुर्वैशारद्यजोऽष्टादशावेणिकबुद्धधर्मजस्सर्वपारमितोत्पन्नोऽभिज्ञा(त्रि)
विद्योत्पन्नस्सर्वाकुशलधर्मप्रहाणसर्वकुशलधर्मसंग्रहजः सत्यजस्सम्यक्त्वजोऽप्रमादजः ।

"मित्राः, तथागतकायो ह्यप्रमाणकुशलकर्मजः । तस्मिन्युष्माभिरवंकायेऽधिमुक्तिरुत्पादयितव्या । सर्वसत्त्वक्लेशरोगप्रजहनार्थाय आनुत्तरसम्यक्सम्बोधिचित्तमुत्पादयितव्यम्" ।

एवमेव लिच्छविर्विमलकीर्तिस्तथा हि तस्मै रोगप्रश्नगणाय, यथा बहुशतानां सत्त्वसहस्राणामनुत्तरसम्यक्सम्बोधिचित्तमुत्पादितम्, तथा हृयेवं धर्मं देशयति स्म ।

अचिन्त्योपायकौशल्यस्य परिवर्तो नाम द्वितीयः ।

३. श्रावकबोधिसत्त्वप्रेषणोक्तम्

ततो लिच्छवेर्विमलकीर्तेरेतदभूत् "मयि ग्लाने दुअःखिते च मञ्चस्योपरि सन्ने, तथागतेनार्हता सम्यक्सम्बुद्धेन, मान्न समन्वाहृत्यानुकम्पान्नोपादाय, रोगपृच्छनन्न किञ्चिदप्युत्सृष्टम्" इति ।

अथ भगवांल् लिच्छवेर्विमलकीर्तेरीदृशं चित्तसङ्कल्पं बुद्ध्वा, आयुष्मन्तं शारिपुत्रमामन्त्रयते स्म "शारिपुत्र, लिच्छवेर्विमलकीर्ते रोगपृच्छनाय गच्छ" ।।

एवमुक्ते, भगवन्तमायुष्मांशारिपुत्र एतदवोचत् "भगवन्, लिच्छवेर्विमलकीर्ते रोगपृच्छनगमनन्नोत्सहे । तत्कस्य हेतोः? भगवन्, अभिजानामि

"एकस्मिन्समय एकस्मिन्वृक्ष मूले मां प्रतिसंलीनं लिच्छविर्विमलकीर्तिरपि, येन तस्य वृक्षस्य मूलं तेनोपसंक्रम्यैतद्वदति स्मऽभदन्त शारिपुत्र, यथा त्वं प्रतिसंलीनस्तादृशे प्रतिसंलयने न प्रतिसंलयितव्यम्ऽ ।

"ऽयथा त्रैधातुककायश्च चित्तंच न प्रज्ञायेते, तथा हि प्रतिसंलय । यथा निरोधान्नोत्तिष्ठति सर्वत्रापीर्यापथमाविर्भवति, तथा हि प्रतिसंलय । यथा प्राप्तिलक्षणानुत्सृजनातायां पृथग्जनलक्षणमेवापि दृश्यते, तथा हि प्रतिसंलय । यथा पुनस्तव चित्तमध्यात्ममनवस्थितम्, बाहृयरूपेऽपि नानुविचरति, तथा प्रतिसंलय । यथा सर्वदृष्टिगतेष्वचलोऽपि च सप्तत्रिंशद्बोधिपाक्षिकधर्माभासं गच्छति, तथा हि प्रतिसंलय । यथा संसारावचरक्लेशाप्रहाणे निर्वाणसमवसरणमपि गच्छति, तथा हि प्रतिसंलय । भदन्त शारिपुत्र, य एवं प्रतिसंलयने प्रतिसंलीनाः, तान्भगवान्प्रतिसंलयन आमन्त्रयते स्मऽ ।

"इत्युक्ते, भगवन्, तं धर्ममेव श्रुत्वा, तस्मै प्रतिवादविसर्जनस्यासमर्थस्तूष्णीभूतोऽभूवं । एतस्मात्कारणात्तस्य सत्पुरुषस्य रोगपृच्छनगमनन्नोत्सहे" ।

अथ भगवानायुष्मन्तं महामौद्गल्यायनं आमन्त्रयते स्म "मौद्गल्यायन, लिच्छवेर्विमलकीर्ते रोगपृच्छनाय गच्छ" । मौद्गल्यायनोऽपि त्ववोचत् "भगवन्, तस्य सत्पुरुषस्य रोगपृच्छनगमनन्नोत्सहे । तत्कस्य हेतोअः? भगवन्, अभिजानामि

"एकस्मिन्समये वैशाल्या महानगर्या एकस्मिन्वीथीद्वारे गृहपतिभ्यो धर्ममदेशयं । तस्मिन्समिपे लिच्छविर्विमलकीर्तिरुपसंक्रम्य, मामेतद्वदति स्मऽभदन्त मौद्गल्यायन, यथावदातवस्त्रेभ्यो गृहिभ्यो देशयसि, तथा हि धर्मोऽव्यपदेश्यः । भदन्त मौद्गल्यायन, स धर्मो यथाधर्म दर्शयितव्यः ।

"sधर्मो हि, भदन्त मौद्गल्यायन, निःसत्त्वः सत्त्वरजोऽपगतः । निरात्मकः (स) रागरजोऽपगतो निर्जीव उपपत्तिच्युत्यपगतः योऽनाश्रवः, पूर्वान्तापरान्तपरिच्छिन्नः (सः) । शान्तोपशमलक्षणस्(स)रागरहितःऽनालम्बनगामी (सो)s नक्षरस्सर्ववाच्छिन्नोऽनभिलाप्यस्सर्वतरंगरहितः । सर्वानुगत आकाशसमो वर्णलिङ्गाकारविगतः सर्वचरणापगतो ममाभावो ममकारापगतस्(सः) । (सो)ऽविज्ञप्तिकश्चित्तमनोविज्ञानविगतः, प्रतिपक्षाभावकारणादतुल्यः । हेतुप्रतिकूलः (स) प्रत्ययाव्यवस्थितः ।

"sधर्मधातुसमवसरणात् (स) सर्वधर्मान्हि समादधात्यननुगमननयेन तथतानुगतः । (सो)ऽत्यन्ताकम्प्यः; अतः स्थितो भूतकोट्यां षड्विषयेष्वाश्रयरहितत्वेनाकम्प्यः, अप्रतिष्ठितेन यत्र यत्र गमनागमनव्यपगतः, शून्यतासमवसरणः । अनिमित्तेन सुस्फुटितः (सो) । अप्रणिहितलक्षण एव, कल्पना अपनयापगतः । अपकाररहितः (सो)ऽप्रक्षेप उत्पादव्ययापगतोऽनालयश्चक्षुःश्रोत्रघ्राणजिह्वाकायमनः पद्धतिसमतिक्रान्तोऽनुन्नतोऽनवनतोऽवस्थितोऽचलभूतः ।

"sसर्वचर्याविगते, भदन्त महामौद्गल्यायन, एवं धर्मे देशना कथं भवति? भदन्त महामौद्गल्यायन, सापि धर्मदेशना नामारोपितवचनं । यच्छ्रवणम्, तदप्यारोपितश्रवणं । भदन्त मौद्गल्यायन, यत्रारोपितवचनन्नास्ति, नास्ति तत्र धर्मदेशना, श्रवणं च ज्ञानं च न स्तः । तद्यथापि नाम मायापुरुषेण मायापुरुषेभ्यो धर्मो देश्येत ।

"sअनेन चित्तस्थानेन धर्मो दर्शयितव्यः त्वया सत्त्वेन्द्रियकौशल्यं करणीयं । प्रज्ञाचक्षुषा सुदर्शिना च महाकरुणाभिमुखीभूतेन च महायानवर्णवादिना च बुद्धकृतज्ञेन च परिशुद्धाशयेन च धर्मनिरुक्तिविज्ञानेन त्रिरत्नगोत्राच्छिन्नकरणार्थाय त्वया धर्मो दर्शयितव्यःऽ ।

"इत्युक्ते, भगवन्, तथैवं तद्धर्मोपदेशेन तस्या गृहपतिपरिषदोऽष्टाभिर्गृहपति शतैरनुत्तरसम्यक्संबोधिचित्तमुत्पादितं । अहं तु, भगवन्, प्रतिभानापगतोऽभूवं । एतस्मात्कारणात्तस्य सत्पुरुषस्य रोगपृच्छनगमनन्नोत्सहे" ।

ततो भगवानायुष्मन्तं महाकाश्यपमामन्त्रयते स्म "काश्यप, लिच्छवेविमलकीर्ते रोगपृच्छनाय गच्छ" । महाकाश्यपोऽपि त्ववोचत्"भगवन्, तस्य सत्पुरुषस्य रोगपृच्छनगमनन्नोत्सहे । तत्कस्य हेतोः? अभिजानामि
"एकस्मिन्समये मम दरिद्रवीथ्यां पिण्डपाताय स्थितं लिच्छविर्विमलकिर्तिः, तेनोपसंक्रम्य, एतद्वदति स्मऽतथा हि महासत्त्वगृहा (णि) हित्वा, दरिद्रगृहाणि गच्छतो भदन्तस्य महाकाश्यपस्य भवन्त्येकदेशमैत्री ।

"sतस्मात्, महाकाश्यप, धर्मसमतायां स्थातव्यं । सर्वकाले सर्वसत्त्वान्त्समन्वाहृत्य, पिण्डपातः पर्येष्टितव्यः । निराहाराहारः पर्येष्टितव्यः । परिपिण्डग्राहविनोदनार्थाय पिण्डपाताय चरितव्यं ।

शून्यग्रामाधिष्ठितेन त्वया ग्रामं प्रवेष्टव्यं । पुंस्त्रीपरिपाचनार्थाय ग्रामं प्रवेष्टव्यं । बुद्धविद्यया त्वयान्तर्गृहे गन्तव्यं ।

"sअनादानेन पिण्डपात उपादेयः, जात्यन्धोपमेन रूपाणि द्रष्टव्यानि, प्रतिश्रुत्कानिभाः शब्दाः श्रोतव्याः, वायुतुल्या गन्ध घ्रातव्याः, अविज्ञप्तिकेन रसा अनुभवितव्याः, ज्ञानस्पर्शाभावेन स्प्रष्टव्यानि स्पर्ष्टव्यानि, मायापुरुषस्य विज्ञानेन धर्मा वेदितव्याः । यौ न च स्वभावो न च परभावस्तौ नोज्ज्वलौ । यदज्वलनम्, तन्न शाम्यति ।

"sयदि, स्थविर महाकाश्यप, अष्टमिथ्यात्वाव्यतिक्रमणे चाष्टविमोक्षसमापत्त्यांच मिथ्यात्वसमतया सम्यक्त्वसमतां प्रविशसे, एकपिण्डपातमपि सर्वसत्त्वेभ्यो ददत्, सर्वबुद्धेभ्यश्च सर्वार्येभ्योऽप्यनुप्रयच्छसि चोपनाभ्य, पुरत आत्मना भोजनं दृष्टं स्यात्, यथा न च क्लेशसंप्रयुक्तो न च क्लेशविप्रमुक्तस्तथा हि परिभोक्ष्यसि; न समाहितो वा (समाधि)समुत्थितो व परिभोक्ष्यसि संसारनिर्वाणाप्रतिष्ठितः ।

"sभदन्त, ये केचन तुभ्यं पिण्डपातं ददति, तेभ्यो महाफलं वाल्पफलं वा न भवतः, न च मध्य(फलं) विशेष(फलं) वा । (ते) बुद्धप्रवृत्तिं समवसरन्ति, न तु श्रावकगतिं । स्थविर महाकाश्यप, तथा ह्यमोघराष्ट्रपिण्डं परिभोक्ष्यसिs ।

"इत्युक्ते, भगवन्, अहमिमं धर्मोपदेशं श्रुत्वा, आश्चर्याद्भुतप्राप्तः सर्वबोधिसत्त्वेभ्यः प्रणाममकार्षं ।sयदि गृहस्थोऽप्येवंप्रतिभानसंपन्नः कोऽनुत्तरसम्यक्संबोधिचित्तन्नोत्पादयेद्s [इति] चिन्तयित्वा, पूर्वं महायानेऽप्राप्ते, तदर्वांमया न कश्चित्सत्त्वः श्रावकप्रत्येकबुद्धयानयोर्विवेशितः । भगवन्, एतस्मात्कारणात्तस्य सत्युरुषस्य रोगपृच्छनगमनन्नोत्सहे" ।

अथ भगवानायुष्मन्तं सुभूतिमामन्त्रयते स्म "सुभूते .....गच्छ" । सुभूतिरपि त्ववोचत् "भगवन्, ...नोत्सहे ।

"एकस्मिन्समये वैशाल्याम्महानगर्यां लिच्छवेर्विमलकीर्तेर्गेहं पिण्डपातायागतस्य लिच्छविर्विमलकिर्तिर्मे पात्रमिष्ट्वा, (तत्) प्रणीताहारेण पूरयित्वा, एतद्वदति स्म

"sभदन्त सुभुते, त्वंचेदामिषसमतया सर्वधर्मसमतान्वयश्च सर्वधर्मसमतया बुद्धधर्मसमतान्वयः, साम्प्रतमिमं पिण्डपातं भुंधि । (भुंधि,) भदन्त सुभूते, यदि त्वं लोभद्वेषमोहान्न प्रतिनिसृज्य तैस्सार्थं त्वप्रतिष्ठितः; सत्कायदृष्त्यनुच्चाल्य, एकायनमार्गं गतः; त्वयापि त्वविद्याभव तृष्णयोरहतयोर्विद्याविमुक्ती पुनरनवरोपिते (यदि), पंचानन्तरियाणि च तव विमुक्तिश्च समानि, त्वन्न च विमुक्तो न चापि बद्धः, त्वया चत्वार्यार्यसत्यानि न च दृष्टानि सत्यंच नादृष्टम्, फले त्वप्राप्ते पृथग्जनोऽपि नासि, पृथग्जनधर्मात्पुनरनिवृत्तस्त्वन्न चार्यो न चानार्यः, भूयोऽपि सर्वधर्मप्रतिसंयुक्तस्तु सर्वधर्मसंज्ञाविप्रमुक्तः, (इमं पिण्डपातं भुंधि) ।

"s(भुंधि, यदि) त्वया शास्ता चादृष्टोऽश्रुतश्च धर्मार्धश्च संघोऽपर्युपासितः । ये ते षट्शास्तारः यदिदम् पूरणः काश्यपः, मस्करी गोशालीपुत्रः, संजयी वैराडीपुत्रः ककुदः कात्यायनः, अजितः केशकम्बलश्च निर्ग्रन्थो ज्ञातिपुत्रस् तान्भदन्तस्य शास्तॄन्निश्राय, त्वं प्रव्रजित (श्चेद्भुंधि) ।

"sयेन ते षट्शास्तारो गच्छन्ति तेनार्यः सुभूतिरपि गामि (चेत्); सर्वदृष्टिगतेषु प्रविशन्, त्वमपि त्वन्तमध्याप्रतिलब्धः; त्वं (चेत्) पुनरष्टाक्षणप्रतिपन्नः क्षणाप्राप्तः, संक्लेशसम्भूतस्त्वं व्यवदानानुपगतः; यत्सर्वसत्त्वानामरणं, तद्भदन्तस्यारणं (चेत्);त्वद्दानेऽविशोधिते, भदन्त, ये केचित्तुभ्यं पिण्डपातं ददति, ते परं तु (चेत्स्व)विनिपातकराः; (यदि) त्वं सर्वमारसहगतश्च सर्वक्लेशास्त्वत्सहायीभवं गताः; यः क्लेशस्वभावः सोऽपि (चेद्) भदन्तस्य स्वभावो भवति, त्वया सर्वसत्त्वघातकचित्तं उपस्थापितम्, त्वया सर्वबुद्धानुध्वंसनं (कृतं स्यात्), सर्वबुद्धधर्माकीर्तिं कृत्वा, संघे चाप्रतिसरणस्त्वञ्चेन्न कदाचि परिनिर्वासि, तत इमं पिण्डपातं भुंधि ।

"इत्युक्ते, इमं तन्निर्देशं श्रुत्वा, भगवन्, माम्sतं किं भासिष्येऽहं, किं वक्ष्यामि, किं करणीयम्?s (इति) चिन्तयमानं, दशदिक्षु तमोभूतासु, तत्पात्रमुत्सृज्य, गेहात्प्रतिनिःसरन्तं लिच्छविर्विमलकीर्तिरेतद्वदति स्म

"sभदन्त सुभुते, अक्षरेभ्योऽभयेनेदं पात्रं प्रतीच्छ । भदन्त सुभूते तत्किं मन्यसे तथागतस्य निर्माणे तदुक्तं स्यात्, तस्मात्किं भवेर्भीतः?s तंऽनो हीदं कुलपुत्रs इत्यवचं । स मामब्रवीत्sभदन्त सुभूते, मायानिर्माणस्वभावेभ्यः सर्वधर्मेभ्यो मा भैषिः । तत्कस्य हेतोः? तेषु सर्वेष्वपि वचनेषु तत्स्वभावेषु तस्माहु नाम पण्डिता अक्षरेष्वसङ्गास्तेभ्योऽत्रस्ताः तत्कस्य हेतोः? तेषु सर्वेष्वक्षरेषु ह्यनक्षरेषु, (सर्व) स्थापयित्वा, विमोक्षः सर्वधर्मा हि विमोक्षलक्षणाः ।s

"अस्मिन्निर्देशे देशिते, देवपुत्राणां द्विशतं धर्मेषु विरजं वीतमलं विशुद्धं धर्मचक्षुश्च देवपुत्राणां पञ्चशतमनुलोमिकीं क्षान्ति प्राप्नुवन्ति स्म । अहं तु प्रतिभानापगतस्तस्मै पुनर्विसर्जनस्यासमर्थो (sभूवम्) । एतस्मात्कारणात्, भगवन्तस्य सत्पुरुषस्य रोगपृच्छनगमनन्नोत्सहे । "

ततो भगवानायुष्मन्तं पूर्णमैत्रायणीपुत्रमामन्त्रयते स्म "पूर्ण,..... गच्छ" । पूर्णोऽपि त्ववोचत् "भगवन्..... नोत्सहे..... ।

"एकस्मिन्समये मां महावनस्यैकस्मिन्पृथिवीप्रदेशे स्थितमादिकर्मिकेभ्यो भिक्षुभ्यो धर्म देशयन्तं लिच्छविर्विमलकीर्तिस्तेनागत एदद्वदति स्म

"sभदन्त पूर्ण, समापत्तिमनुप्राप्यैषां भिक्षूणाञ्चित्तं पश्य, (दृष्ट्वा) च धर्म प्रतिवेदस्यस्व । महारत्नभाजनं पूतिकेनौदनेन मा पीपरः । एषां भिक्षूणाम्, जानीहि, अध्याशयः कीदृशः । वैडूर्यमणिरत्नं काचकमणिना मोपमाहि ।

"sभदन्त पूर्ण, सत्त्वेन्द्रियेष्वनिश्चितेषु, प्रादेशिकेन्द्रियं मोपसंहर । अव्रणस्य व्रणं मा प्रसूष्व । महामार्गावतारार्थिक्(एभ्यो) वीर्थीमञ्जरीं मा परिग्रहीअः । महासमुद्रेण गोखुरपदं मा पीपरः । सुमेरु

सर्षपफले मा निक्षिप । दिनकरस्य प्रभां खद्योतकेन मा निराकुरु । सम्यक्सिंहनादार्थिक(एभ्य) शृगालरुतं मा परिग्रहीः ।

"sभदन्त पूर्ण, एषां सर्वभिक्षूणां हि महायानसम्प्रतिपन्ननां बोधिचित्तं भ्रान्तं केवलम्; भदन्त पूर्ण, एभ्यः श्रावकयानं मा प्रकाशय । श्रावकयानं ह्यभूतम्; सत्त्वेन्द्रियक्रमज्ञान इमे श्रावका मया जात्यन्धसदृशा मताःs ।

"अथ लिच्छवौ बिमलकीर्तौ तेन कालेन तादृशं समाधि समापन्ने, यथा तेभ्यो भिक्षुभ्यो विविधपूर्वनिवासानुस्मृतिर्भवति, तेभ्यः सम्यक्सम्बोध्यर्थाय बुद्धानां पञ्चशतं पर्युपासितेभ्यः कुशलमूलसमन्वागतेभ्यः स्व बोधिचित्तमभिमुखीभूत्वा, ते सत्पुरुषस्य पादयोअः शिरसा प्रणिपत्य प्रगृहीताञ्जलयोऽभूवन् । (यथा) पुनस्तेऽनुत्तरसम्यक्सम्बोध्या अविनिवर्तनीया भवन्ति, तस्मिंस्तथा धर्म दर्शितवति, भगवन्, चिन्तयतोममैवमभूत्

"sश्रावकेण, परचित्ताशयानविविच्य, न कस्मैचिद्धर्मो निर्देश्यः । तत्कस्य हेतोअः? श्रावकस्तु सर्वसत्त्ववरावरेन्द्रियविज्ञो नास्तिs यथा तथागतोर्हन्सम्यक्सम्बुद्धस्तथा नित्यसमाहितो नास्तिs । भगवन्, एतस्मात्कारणात्तस्य सत्पुरुषस्य रोगपृच्छनगमनन्नोत्सहे ।"

ततो भगवानायुष्मन्तं महाकात्यायनमामन्त्रयते स्म "कात्यायन,..... गच्छ" । कात्यायनस्त्ववोचत् "भगवन्,..... नोत्सहे..... ।

"एकस्मिन्समये भगवता भिक्षुभ्योऽववादकसूत्रेऽमन्त्रिते, तस्य सूत्रस्य वचननिर्णयाय मां धर्म तद्यथा sअनित्यतादुःखनैरात्म्य शान्त्यर्थम्s देशयमानं लिच्छविर्विमलकीर्तिस्तेनोपसंक्रम्य, एतद्वदति स्म

"sभदन्त महाकात्यायन, प्रचारसम्प्रयुक्तामुत्पादभङ्गसहगतां धर्मतां मा शाधि । यदत्यन्ततोऽनुत्पादितम्, नोत्पद्यते, सञ्जनितन्न भविष्यति; (यदत्यन्ततो)sनिरुद्धम्, न निरुध्यते, निरुद्धन्न भविष्यति, तध्यनित्यताया अर्थः । यः पञ्चस्कन्धेषु शून्यताधिगमेनानुपपत्त्यवबोधार्थः, स हि दुःखस्यार्थः । यात्मनैरात्म्ययोरभावता, सा नैरात्म्यस्यार्थः । यत्स्वभावपरभावापगतं, तध्यज्वलनम्, यदज्वलनम्, तन्न शाम्यति; यदप्रशान्तम्, तच्छान्त्या अर्थःs ।

"अस्मिनुपदेशे देशिते, तेषां भिक्षुणामनुपादायास्रवेभ्यश्चित्तानि विमुक्तान्यभूवन् । भगवन्, एतस्मात्..... नोत्सहे" ।

अथ भगवनायुष्मन्तमनिरुद्धमामन्त्रयते स्म "अनिरुद्ध,..... गच्छ" । अनिरुद्धोऽपि त्ववोचत् "भगवन्, ...नोत्सहे..... । ..... ।

"एकस्मिन्समये मामेकस्मिम्सःचंक्रमणे चंक्रम्यमाणं, येनाहं तेनागम्य, शुभव्यूहो नाम महाब्रह्मा ब्रह्मणां दशसहस्रेण सार्ध तं देशमवभास्य, मम पादौ शिरसाभिवन्द्य, एकान्ते स्थित एतदवोचत्sभदन्तानिरुद्ध,

त्वं भगवताग्रदिव्यचक्षुर्वानाख्यातः; आयुष्मतोऽनिरुद्धस्य दिव्यचक्षुषा कियदर्वाग्दृश्यते?ऽ तं एवमवचम्ऽमित्र, तद्यथापि नाम पुरुषस्य चक्षुर्वतः करतले संनिहितमाम्लफलं दृश्यते, तथा भगवतः शाक्यमुनेर्बुद्धक्षेत्रम्, त्रिसाहस्रमहासाहस्रलोकधातुं पश्यामीऽति ।

"मामेतद्वदन्तं लिच्छविर्विमलकीर्तिस्तं देशमुपसंक्रम्य, मम पादौ शिरसाभिवन्द्य, एतदवोचत्ऽभदन्तस्यानिरुद्धस्य दिव्यचक्षुः किमभिसंस्कारलक्षणं वानभिसंस्कारलक्षणं वा? तद्यद्यभिसंस्कारलक्षणम्, स्याद्बाह्य पञ्चाभिज्ञासमं । यद्यनभिसंस्कार(लक्षणम्), अनभिसंस्कारः स्यादसंस्कृतः । स दर्शनस्याशक्तश्चेत्, स्थविरः कथं पश्येत्?ऽ

"इत्युक्तेऽभूवं तूष्णीभूतः । स ब्रह्मा तु तस्मात्सत्पुरुषादिमं निर्देशं श्रुत्वा, आश्चर्यप्राप्तोऽभिवन्दनं कृत्वा, एतदब्रवीत्ऽलोके दिव्यचक्षुर्वानस्ति कः?ऽ आहऽभगवन्तो बुद्धा हि लोके दिव्यचक्षुर्वन्तः; ते ह्यनुपतसमाहितस्थाने सर्वबुद्धक्षेत्राणि संपश्यन्त्युभाभ्यां अप्रभावितःऽ ।

"अथ ब्रह्मा (च) दश परिजनसहस्राणीमं निर्देशं श्रुत्वा, अध्याशयेनानुत्तरसम्यक्संबोधिचितं संजनयन्ते स्म । ते मह्यंच तस्मै सत्पुरुषाय नमस्कृत्वा, अभिवन्द्य, तत्रैवान्तरधायिषुः । अहं तु प्रतिभानापगतोऽभूवं । एतस्मात्.....नोत्सहे" ।

ततो भगवानायुष्मन्तमुपालिमामन्त्रयते स्म "उपाले,.....गच्छ" । उपालिअः पुनरवोचत् "भगवन्.....नोत्सहे..... ।

"एकस्मिन्समये द्वौ भिक्षू आपत्तिमापन्नौ भगवति लज्जमानौ भगवत्समीपमनुपसंक्रम्य, तावुभौ येनाहं तेनोपसंक्रम्य, मावेवं वदतःऽभदन्तोपाले, आवमापत्तिमापन्नोउ च लज्जमानौ भगवत्समीपं त्वनुपसंक्रम्य, आयुष्मानुपालिरावयोअः संशयं प्रतिविनोदयतु, आवामापत्त्याः प्रणयतुऽ ।

"इत्युक्ते, भगवन्, येन ताभ्यां भिक्षुभ्यां धर्मकथामदेशयं तेन स लिच्छविर्विमलकीर्तिरप्युपसंक्रम्य, मामेतद्वदति स्म

"ऽभदन्तोपाले, त्वयानयोर्भिक्ष्वोरापत्तिर्भूयो दृढा न कर्तव्या, नाविल(तरा) कर्तव्या; अनयोरापत्तिविप्रतिसारं प्रतिविनोदय । भदन्तोपाले, आपत्तिर्ह्यध्यात्ममप्रतिष्ठिता, बहिर्धाव्यतिवृत्ता; उभयेष्वसत्सु च (सा) नोपलभ्यते । तत्कस्य हेतोअः? भगवानवोचत्चित्तसंक्लेशेन सत्त्वसंक्लेशः; चित्तव्यवदानेन विशुद्धिरिति

"ऽसुभाषितार्थे, भदन्तोपाले, चित्तमध्यात्मं वा बहिर्धा वा नास्ति; उभयेष्वसत्स्वपि (तन्)नोपलभ्यते । चित्तं यथा तथाप्यापत्तिअः । यथापत्तिस्तथापि सर्वधर्माःतथताया नातिक्रामण्ति ।

"ऽभदन्तोपाले, यश्चित्तस्वभावः स भदन्तस्य विमुक्तचित्तस्य चित्तस्वभावो येन केन चित्तस्वभावेन कि कदाचन संक्लिष्टोऽभूत्?ऽ अब्रवमःऽनो हीदंऽ । आहऽभदन्तोपाले, सर्वसत्त्वचित्तं हि तत्स्वभावः ।

"sभदन्तोपाले, संकल्पो हि क्लेशः, निर्विकल्पोऽविकल्पना स्वभावः । विपर्यासः संक्लेश, अविपर्यासः स्वभावः । आत्मसमारोपः संक्लेशः, नैरात्म्यं स्वभावः ।

"sभदन्तोपाले, सर्वधर्मा ह्युपपद्य, विनश्यन्तोऽप्रतिष्ठिता मायाभ्रविधुदुपमाः । सर्वधर्मा अनवस्थिताः क्षणमात्रमपि न तिष्ठन्ति । सर्वधर्मा हि स्वप्नमरीचिनिभा अभूतदर्शनं । सर्वधर्मा उदकचन्द्रप्रतिबिम्बकल्पाश्चित्तसंकल्पात्समुछ्रिताः । यैः कैश्चन तथाहि प्रज्ञायते, ते विनयधरा नामोच्यन्ते; ये केचनैवं दांतास्ते सुदांताःऽ ।

"अथ तौ भिक्षू एतदवदताम्ऽअयं गृहपतिअः सुप्रज्ञावान्; विनयधराणां भगवतैष ह्यग्र आख्यातो भदन्तोपालिस्तादृशः (सुप्रज्ञावान्) नास्तिऽ । ताभ्यामेवमवचम्ऽभिक्षू, इमं युवां गृहपतिम्मा प्रतिजानीतं । तत्कस्य हेतोः? स्थापयित्वा तथागतम्, ये केचनास्य प्रतिभानप्रतिप्रस्रब्ध्याः समर्थाः श्रावका वा बोधिसत्त्वा वा, ते केचिन्न विद्यन्ते । अस्य प्रज्ञालोकस्तज्जातीयःऽ ।

"ततस्तौ भिक्षू विचिकित्सां प्रतिनिसृज्य, तत्रैवाध्याशयेनानुत्तरसम्यक्सम्बोधिचित्तं संजनयमानौ, तं सत्पुरुषमभिवन्द्य, एतदवदताम्ऽसर्वसत्त्वा अपि चैवंरूपं प्रतिभानं लभेरन्ऽ, इति । एतस्मात्.....नोत्सहे" ।

अथ भगवानायुष्मन्तं राहुलमामन्त्रयते स्म "राहुल,..... गच्छ" । राहुलस्त्ववोचत् "भगवान्,..... नोत्सहे..... ।

"एकस्मिन्समयेऽनेकलिच्छविकुमारा येनाहं तेनोपसंक्रम्य, मामेवं वदन्ति स्मऽभदन्त राहुल, त्वं भगवतोऽसि पुत्रः । चक्रवर्तिराज्यं हित्वा, प्रव्रज्य, कि त्वयोपलब्धम्, प्रव्रज्याया गुणानुशंसं किम्?ऽ इत्युक्ते, मां तेभ्यो यथायोगं प्रव्रज्यागुणानुशंसं देशयन्तं लिच्छविर्विमलकीर्तिरपि, येनाहं तेनोपसंक्रान्तो मह्यन्नमस्कृत्वा, एतदवोचत्

"sभदन्त राहुल, यथा प्रव्रज्या गुणानुशंसं देशयसि तथा न देशयेः । तत्कस्य हेतोः? प्रवज्या हि गुणरहिता, अनुशंसापगता । भदन्त राहुल, यस्मै संस्कृतं प्रवर्तते तस्मै गुणानुशंसम्; प्रव्रज्या त्वसंस्कृतयोगश्चासंस्कृते गुणानुशंसन्नास्ति ।

"sभदन्त राहुल, अरूपिणी हि प्रव्रज्या रूपापगता, अवराग्रान्तदृष्टिविगता निर्वाणपथः, पण्डितैर्वर्णिता, आर्यैः परिगृहीता सर्वमारपराजयकरा, पञ्चगति निअःसरणम्, पञ्चचक्षुः शोधना, पञ्चबलप्राप्तिः, पञ्चेन्द्रियाश्रयः; (सा)ऽन्येभ्योऽपीडा पापधर्मासंसृष्टा परतीर्थिकसुदमनं, प्रज्ञप्तिसमतिक्रान्ता कामपंके गम्भीरः, आधारणरहिता ममाभावा वीताहङ्कारा; अनुपादानम्, अनुपायासः, संक्षोभप्रतिनिःसर्गः, स्वचित्तविनयश्च परचित्तरक्षणम्, शमथसामग्री, सर्वत्र निरवद्य(त्वम्) सा हि प्रव्रज्या नाम । ये केचन तथा हि प्रव्रजितास्ते सुप्रव्रजिताः ।

"sकुमाराः, एतादृशे स्वाख्याते धर्मे प्रव्रजत । बुद्धोत्पादो दुर्लभः, क्षणसम्पदपि च दुर्लभा, दुर्लभा पुनर्मनुष्यगतिअः s ।

"ते कुमारा एतदवदन्sगृहपते, अस्माभिर्यथा श्रुतं तथागतेन(ओक्तम्) मातापितृभ्यामनुत्सृष्टः प्रव्राजको न (भवतीs)ति । स तानब्रवीत्sकुमाराः, अनुत्तरसम्यक्सम्बोधिचित्तं संजनयमानाः प्रयत्नेन प्रतिपत्स्यथ । (तथा हि) यूयं तत्त्वतः प्रव्रजिताश्चोपसम्पन्नाः s ।

"अथ त्रिसहस्रं द्विशतं लिच्छविकुमारा अनुत्तरसम्यक्सम्बोधिचित्तमुत्पादयन्ति स्म । भगवन्, एतस्मात्.....नोत्सहे" ।

ततो भगवानायुष्मन्तमानन्दमामन्त्रयते स्म "आनन्द,.....गच्छ" । आनन्द; पुनरवोचत् "भगवन्,.....नोत्सहे..... ।

"एकस्मिन्समये भगवतः काय एको रोगो निश्चार्य, तस्मै क्षीरमाकाङ्क्षमाणोsहमेकस्य ब्राह्मणमहाशालकुलस्य द्वारसमीपे पात्रधारी स्थितो (sभूवम्) । लिच्छविर्विमलकीर्तिरपि तद्देशमुपसंक्रम्य, मह्यन्नम स्कृत्वा, एवं वदति स्म

"sभदन्तानन्द, किमर्थं कल्यमेव पात्रमादाय, अस्य कुलस्य द्वारसमीपे स्थितोऽसि?s तमेवमवचम्sभगवतः काय एको रोगो निश्चार्य, तस्मै क्षीरेण प्रयोजनात्तद्(भैषज्यं) पर्येषs इत्यवादिषं । स मामेतदवोचत्

"sभदन्तानन्द, एवम्मा वग्धि । भदन्तानन्द, तथागतस्य हि कायो वज्रकठिनः, सर्वाकुशलवासनाप्रहीणः । तस्मै सर्वकुशलधर्मोपेताय रोगः कुतो भवेत्? आतंकस्तस्मै कुतः?

"sभदन्तानन्द, भगवतेऽनुध्वंसनाकरणाय तूष्णीं प्रतिगच्छ । कञ्चिदन्यमेतन्मा वग्धि । महामहौजस्का देवपुत्राश्च बुद्धक्षेत्रसमागता बोधिसत्त्वा हि श्रोष्यन्ति । भदन्तानन्द, यदि परीत्तकुशलमूलोपेतश्चक्रवर्तिराजोऽप्यरोगः, तस्मा अप्रमाणकुशलमूलसहगताय भगवते रोगः कुतः? तत्स्थानन्न बिद्यते ।

"sभदन्तानन्द, मां लज्जितकरणाय प्रतिगच्छ । अन्यतीर्थिकाः, मीमांसकाः, परिब्राजकाः, निर्ग्रन्थाः, आजीविकाश्च हि श्रोष्यन्ति । त एवम्sअहो यद्येषां शास्ता स्वातुरत्राणस्याप्यसमर्थः, सत्त्वातुराणां त्राणमिव (दातुं) कुतः शक्नोतीऽ(ति) चिन्तयिष्यन्ति । भदन्तानन्द, प्रतिच्छादयमानोऽन्तर्धानं गच्छेः, कश्चिच्छृणुयात् ।

"sभदन्तानन्द, तथागता हि धर्मकायः, न (स) आहारपोषितं देहं । तथागताः सर्वलोकधर्मसमतिक्रान्तो लोकोत्तरकायः । तथागतस्य कायोऽनुपद्रवो विनिवृत्तास्रवः । तथागतस्य कायो ह्यसंस्कृतः सर्वसंस्कारापगतः । भदन्तानन्द, ईदृशाय व्याधिमेष्टुम्, अयुक्तिश्चासदृशम्s ।

"sइत्युक्ते, तत्रsकिं मया भगवतो मिथ्या श्रुतम्, मिथ्योद्गृहीतम्?s (इति) चिन्तयमानोsतिलज्जितो भूत्वा, अथान्तरीक्षात्स्वरमश्रौषम्sआनन्द, गृहपतिर्यथा देशयति, तत्तथा; अपि तु भगवति पञ्चकषाय काल उत्पन्ने, अतः सत्त्वा हीनेन प्रदानचरितेन दम्याः । ततः, आनन्द, अलज्जितः क्षीरमाहृत्य प्रतिगच्छेsत्यवादीत् ।

"भगवन्, लिच्छवेर्विमलकीर्तेः प्रश्नसमाधानोपदेशस्तादृशो (sभुत्) । एतस्माद्भगवन्,..... नोत्सहे" ।

एवमेव पञ्चशतमात्राः श्रावका अनुत्सहमानाः "स्वप्रतिभानम्" भगवन्तमवोचन् । यल्लिच्छविना विमलकीर्तिना सह कथितं, तत्सर्वं भगवन्तमवोचन् ।

अथ भगवान्बोधिसत्त्वं मैत्रेयमामन्त्रयते स्म "मैत्रेय,..... गच्छ" । मैत्रेयस्त्ववोचत् "भगवन्,..... नोत्सहे..... ।

"एकस्मिन्समये सन्तुषितदेवपुत्रगणेन (च) तुषितवंशदेवपुत्रैः सार्ध (येनाहं), बोधिसत्त्वमहासत्त्वानामवैवर्तिकभूमिमारभ्य, तथा हि धर्मकथां कथयमानः, तेन लिच्छविर्विमलकीर्तिरूपसंक्रम्य, मामेतदवोचत्

"sमैत्रेय, यदि त्वं भगवतानुत्तरायां सम्यक्सम्बोध्यामेकजातिप्रतिबद्धो व्याकृतः, स मैत्रेयः कया जात्या व्याकृतः? अतीतेन किम्? अहो स्विदनागतेन? अहो स्वित्प्रत्युपन्नेन? तत्र यातीतजातिः, सा हि क्षीणा । यदनागतम्, तदननुप्राप्तं । प्रत्युत्पन्नजात्यां तु स्थानन्नास्ति । तद्यथा भगवताsतथा हि भिक्षो, एकक्षणे त्वं जायसे, जीर्यसे, म्रियसे, च्यवसे, उपपद्यसs इति सुभाषितं । अनुत्पादे नियामावक्रान्तिः, अजातिख्याकृता ।

"sअनुत्पद्यमानश्चेन्नाभिसम्बुध्यसे; मैत्रेय, कथं व्याकृतोsसि? तथताजात्या वा तथतानिरोधेन वा? तथतोत्पादनिरोधापगता, अनुपत्स्यमाना चानिरोत्स्यमाना ।

"sया सर्वसत्त्वानां, सर्वधर्माणाञ्च सर्वार्याणांच तथता, सा हि, मैत्रेय, तवापि तथाता । त्वञ्चेदेवंव्याकृतः, सर्वसत्त्वा अप्य्(एवं) व्याकृताः । तत्कस्य हेतोः? तथता हि द्वयाप्रभाविता, नानात्वाप्रभाविता । तेन हि, मैत्रेय, यदा त्वं बोधिमभिसम्भोत्स्यसे, तदा सर्वसत्त्वा अपि तादृशां बोधिमभिसम्भोत्स्यन्ते । तत्कस्य हेतोः? बोधिर्हि सर्वसत्त्वान्वया । मैत्रेय, यदा त्वं परिनिर्वृतस्तदा सर्वसत्त्वा अपि परिनिर्वायिष्यन्ति । तत्कस्य हेतोः? (यदि) सर्वसत्त्वाः (स्युर्) अपरिनिर्वृताः, तथागतः (स्याद्) अपरिनिर्वृतः । सर्वे ते सत्त्वाः सुपरिनिर्वृतास्तेन हि निर्वाणजातीया दृश्यन्ते । मैत्रेय, तस्मादिमान्देवपुत्रान्मा विप्रलम्भस्व, मा वञ्चयस्व ।

"sबोध्यान्न कश्चित्प्रतिष्ठिते(वा) विवर्तते(वा) । तस्मान्मैत्रेय, इमान्देवपुत्रांस्तां बोधिसङ्कल्पदृष्टिमुत्सर्जय । बोधिन्न कायेन नापि चित्तेनाभिसम्बुध्यति । बोधिर्हि सर्वनिमित्तव्यूपशमः

। बोधिः सर्वालम्बनारोप रहिता, सर्वमनसिकारप्रचारापगता, सर्वदृष्टिगतपरिच्छिन्ना, सर्वपरितर्कविगता; बोधिः सर्वेञ्जितचेतश्चलनविसंयुक्ता, सर्वप्रणिधानाप्रवृता, सर्वोद्ग्रहणविरहिता, अश्लेषप्रतिपन्ना, धर्मधातुनिश्रयनिश्रिता, तथतान्वया भूतकोट्यवस्थिता मनोधर्माभावेनाद्वया, आकाशसमसमा, उत्पादव्ययस्थित्यन्यथात्वाभावेनासंस्कृता ।

"sबोधिः सर्वसत्त्वानाञ्चित्तचर्याध्याशयपरिज्ञा, आयतनानां द्वाराभूता सर्ववासनाप्रतिसन्धिक्लेशविप्रमुक्तासंसृष्टा, स्थानास्थानविसंयोगेन विषयाप्रतिष्ठिता, sसमन्ततोदेशानवस्थिता, प्रादुर्भाविनी तथतानुपस्थिता । बोधिर्नाममात्रा, तन्नामाप्यचलं । आयूहनिर्यूहविगता बोधिरतरङ्गा । बोधिर्निरुपायासा, प्रकृत्या परिशुद्धा, प्रभासः स्वभावविशुद्धा । बोधिरनुद्ग्रहणा स्वनालम्बना, सर्वधर्मसमताधिगमेनाभिन्ना । बोधिरुदाहरण विश्लेषेणानुपमा, सुदुरवबोधायतः सूक्ष्मा ।

"sबोधिश्चेदाकाशस्वभावेन सर्वत्रगा, सा हि कायेन वा चित्तेन वाभिसम्बुद्धनायासमर्था । तत्कस्य हेतोः? कायो हि तृणकाष्ठकुड्यपथप्रतिभासनिभः । चित्तमरूपमसनिदर्शनमनिश्रयमविज्ञप्तिकम्" ।

"भगवन्, अस्मिनुपदेशे प्रकाशिते, तस्याः परिषदो द्वे शते देवपुत्राणामनुत्पत्तिकधर्मक्षान्तिं प्राप्नुवन् । अहं त्वपगतप्रतिभानोsभूवं । एतस्मात्.....नोत्सहे" ।

ततो भगवाल्लिंच्छविकुमारं प्रभाव्यूहमामन्त्रयते स्म "प्रभाव्यूह,..... गच्छ" । प्रभाव्यूहोsप्यवोचत् "भगवन्,..... नोत्सहे..... ।

"एकस्मिन्समये वैशाल्या महानगर्या निर्गतोsहं लिच्छविंविमलकीर्तिं प्रविशन्तं समागमं । स मामभिवाद्य, (तम्) एतदवादिषम्sगृहपते, कुत आगतः?s स मामब्रवीत्sआगतो बोधिमण्डात्s । तमब्रवम्sतद्वोधिमण्डन्नाम किमधिवचनम्?s स मामेतदवोचत्sकुलपुत्र, बोधिमण्डन्नामतध्यकृत्रिमकारणादाशयमण्डम्, व्यापारकर्मोत्तारणकारणात्तद्हि योगमण्डम्, विशेषाधिगमकारणात्तद्हृयध्याशय मण्डम्, समविस्मारणकारणात्तद्हि बोधिचित्तमण्डं ।

"sविपाकाप्रतिकाङ्क्षणताकारणात्तद्हि दानमण्डम्; तच्छीलमण्डं प्रणिधानपरिपूरणात्; सर्वसत्त्वेषु प्रतिघचित्ताभावेन क्षान्तिमण्डम्; अविनिवर्तनीयकारणाद्वीर्यमण्डम्; चित्तकर्मण्यताकारणाद्ध्यानमण्डम्; प्रत्यक्षदर्शनात्प्रज्ञामण्डं ।

"sसर्वसत्त्वेषु समचित्तकारणान्मैत्रीमण्डम्; सर्वोपक्रमसहनकारणात्करुणामण्डम्; धर्मानन्दाभिरत्यधिमुक्तिकारणान्मुदितामण्दम्; अनुनय प्रतिघप्रतिनिसर्गात्तध्युपेक्षामण्डं ।

"षडभिज्ञ (प्रात्प्या)sभिज्ञामण्डम्, निर्विकल्पाद्विमोक्षमण्डम्, सत्त्वपरिपाचनादुपायामण्डम्, सर्वसत्त्वसंग्रहकारणात्संग्रहवस्तुमण्डम्, प्रतिपत्तिसाख्यापाराच्छ्रवणमण्डम्, योनिशः प्रत्यवेक्षणान्निध्यप्तिमण्डम्, संस्कृतासंस्कृतप्रहाणकारणाद्वोधिपाक्षिपाक्षिकधर्ममण्डम्,

सर्वलोकावंचनात्सत्यमण्डम्, अविद्यास्रवक्षयाज्जरामरणं यावदास्रवक्षयकारणात्प्रतीत्यसमुत्पादमण्डम्, यथाभूतमभिसम्बोधिकारणात्सर्वक्लेशप्रशममण्डं ।

"सर्वसत्त्वनिःस्वभावात्तधि सर्वसत्त्वमण्डम्, शून्यताभिसम्बोधिकारणात्तद्हि सर्वधर्ममण्डम्, अचलकारणात्सर्वमारप्रमर्दनमण्डम्, प्रवेशवियोगात्त्रैधातुकमण्डम्, अभयासन्त्रासकारणात्सिंहनादनादिनो वीर्यमण्डम्, सर्वत्रानिन्दितकारणात्तद्हि सर्वबलवैशारद्यावेणिकबुद्धधर्ममण्डम्, क्लेशाशेषकारणात्त्रैविद्यतामण्डम्, सर्वज्ञज्ञानसमुदागमात्तध्येकचित्तक्षणे सर्वधर्मनिरवशेषाधिगममण्डं ।

"sयावत्तथा हि, कुलपुत्र, बोधिसत्त्वाः पारमितासमन्वागताः, सत्त्वपरिपाचनसमर्पिताः, सद्धर्माधारणप्रतिसंयुताः (तादृशानां) कुशलमूलसहगतानां सर्वाणि पादनिःक्षेपणोत्क्षेपणानि, बोधिमण्डादागतानी, बुद्धधर्मेभ्य आगतानि, बुद्धधर्मेषु प्रतिष्ठितानिs ।

"भगवन्, अस्मिन्निर्देशे देशिते, देवमनुष्याणां पञ्चशतमात्रेण बोधिचित्त उत्पादिते, अहं तु ततोऽपगतप्रतिभानोऽभूवं । एतस्मात्.....नोत्सहे" ।

अथ भगवान्बोधिसत्त्वं जगतींधरमामन्त्रयते स्म "जगतींधर,.....गच्छ" । जगतींधरस्त्ववोचत् "भगवन्,.....नोत्सहे..... ।

"एकस्मिन्समये स्वस्थाने स्थितिकाले येनाहं, मारः पापीमानप्सरसां द्वादशसहस्रैः परिवृतः शक्रस्य वेषेण तूर्यञ्च सङ्गीतिमुपादाय, तेनोपसंक्रम्य मम पादौ शिरसाभिवन्द्य, स सपरिवारो मां पुरस्कृतवानेकान्तेऽस्थात् ।

"तन्तु शक्रं देवेन्द्रं चिन्तयमानस्तमेतदवचम्sकौशिक, तुभ्यं स्वागतं । सर्वकामरसेष्वप्रमादं कुरु । कायजीवभोगात्सारादानानित्यतासंकल्पं बहुलीकुरुs ।

"अथ स मामेतदवादीत्sसत्पुरुष, इमानि द्वादशसहस्राण्यप्सरसां मद्गृहाण च इमास्तव परिवारं कुर्वs इति वदति स्म । तमेवम्sकौशिक, अयोग्यवस्तु श्रमणाय शाक्यपुत्राय मा दाः । तध्यस्मभ्यमयोग्यम्s इत्यवदं । तस्यां कथायां कथितायाम्, स लिच्छविर्विमलकीर्तिरुपसंक्रम्य, मामेवम्sकुलपुत्र, अस्मिञ्शक्र एवं संज्ञाम्मोत्पादय । अयं हि मारः पापीमान् । त्वयि विडम्बनार्थमागतः, (स) शक्रो नास्तीs त्यवदीत् ।

"अथ लिच्छविर्विमलकीर्तिस्तं मारं पापीमन्तमेवम्sमार पापीमनिमा अप्सरसः श्रमणाय शाक्यपुत्रायायोग्याः; तेन मह्यं ताः प्रयच्छेs त्यवोचत् । ततो मारस्य पापीमतो भयभीतस्य संविग्नस्यऽअयं लिच्छविर्विमलकीर्तिर्मद्वञ्चनाया आगच्छतीऽत्य (भूत्) । अन्तर्धानं कर्तुकामः सोऽसमर्थः; सर्वद्धिविधीर्दर्शयित्वा, पुनरन्तर्धानस्यासमर्थोऽभूत् ।

"अथान्तरीक्षाद्घोषोनिश्चरति स्मऽपापीमन्, इमा अप्सरसोऽस्मै सत्पुरुषायोपनामय, पुरतश्च स्वस्थानं गन्तुं शक्ष्यसिऽ । ततो मारः पापीमान्भयभीतोऽनाकाङ्क्षमाणस्तथा ता अप्सरस उपनामयति स्म ।

"अथ विमलकीर्तिस्ता अप्सरसः प्रतिगृह्य ता एतदब्रवीत्sयूयं पापीमता मह्यं दत्ताः; तेनानुत्तरसम्यक्सम्बोधिचित्तमुत्पादयतs । स ताभ्यो बोधिपरिपाकावहानुलोमिकाभ्कथामकार्षीत्; ताश्च बोधिचित्तमुत्पादयन्ति स्म । ततः स पुनस्तासुsयूयमेतर्हि बोधिचित्तमुत्पाद्य, इतो धर्मसम्मोदे ह्रष्टाधिमोक्षयत, कामे (षु) च ह्रष्टा माधिमोक्षयतेs त्याज्ञापयति स्म । ता अब्रुवन्sसा धर्मसम्मोदरतिः किम्?s

"सोऽब्रवीत्s(सा) रतिर्बुद्धेऽभेद्यश्रद्धा, धर्मश्रवणछन्दो रतिः, सङ्घपर्युपासने रतिः, निर्माणता च गुरुसत्कारे रतिः, धातुसमुदये च विषयास्थाने च रतिः घातकोपमस्कन्धप्रेक्षणे रतिः, सर्पविषमधातुप्रेक्षणे, शून्यग्रामनिभेष्वायतनेषु विवेकरतिः, बोधिचित्तसंरक्षे सत्त्वहितङ्कररतिः, दानसंविभागे शीलास्रंसनेरतिः, क्षान्त्यां क्षमणदमे, वीर्ये कल्याणसम्प्रतिपत्त्यां, ध्यानपरिभोगे च प्रज्ञायां क्लेशनिराभासे च बोध्यामुदाररतिः, मारनिग्रहरतिः, क्लेशसंवधे बुद्धक्षेत्रविशोधने, लक्षणानुव्यञ्जनसमुत्थापनतार्थं सर्वकुशलसन्निचये, गम्भीरधर्मश्रवणात्रासरतिः, त्रिषु विमोक्षमुखेषु परिचयकरणे निर्वाणाध्यालम्बने बोधिमण्डालङ्कारे चाकालप्राप्त्यै निर्व्यापारे च सभागजनाय सेवने चासभागेष्वद्वेषे चाप्रतिघे रतिः, कल्याणमित्रेभ्यः सेवने, पापमित्रविवर्जने च धर्मे चाधिमुक्तिः, सा श्रद्धा, प्रामोद्यरतिश्चोपायसंग्रहरतिश्चाप्रमादे बोधिपक्षयधर्मनिषेवणे च रतिः । एवं हि बोधिसत्त्वधर्मसम्मोदाभिरधिमुक्तिःs ।

"अथ मारः पापीमांस्ता अप्सरस एतदब्रवीत्sइदानीमस्माकमावासं गच्छत । ता अब्रुवन्sत्वया वयमस्मै गृहपते दत्ताः; तेन साभ्प्रतं धर्मसम्मोदाभिरत्यधिमुक्तिः करणीया कामे (षु) त्वभिरत्यधिमुक्तिरकरणीया । ततो मारः पापीमाल्लिंच्छवि विमलकीर्तिमेतदवोचत्sयदि बोधिसत्त्वो महासत्त्वः सर्वस्वपरित्यागी च चित्तग्राहको नास्ति, गृहपते, इमा अप्सरसाः प्रेषयs । विमलकीर्तिरब्रवीत्sइमाः प्रेष्याः; तेन पापीमन्सपरिवारोऽपगच्छ । सर्वसत्त्वधर्माशयः परिपूर्यताम्s । अथ ता अप्सरसो विमलकीर्तयेऽभिवन्दनं कृत्वा, एतदवदन्sगृहपते, कथमस्माभिर्मारस्थाने विहरितव्यम्? "अवोचत्sभगिन्यः, अस्त्यक्षयप्रदिपो नाम धर्ममुखं । तेन प्रतिपद्यत । तदपि, भगिन्यः, किम्? यदिदम्यद्यप्येकप्रदीपात्प्रदीपानां शतसहस्राणि प्रज्वालितानि, स प्रदिपऽपचयन्न गच्छति । एवमेव,भगिन्यः, एकबोधिसत्त्वः सत्त्वानां बहुशतसहस्राणि बोध्यां स्थापयित्वा, स बोधिसत्त्वोऽनपचयचित्तस्मृतिः, पर्यनपचय उपरिवर्धते । तथा च सर्वकुसहलधर्मा यथा यथान्येभ्येः परिभाविताश्चाख्याताः, शासनं तथा तथा सर्वकुशलधर्मैर्विवर्धते । तध्यक्षयप्रदीपो नाम धर्म मुखं । तस्मिन्मारस्थाने विहरमाणा अप्रमान्णदेवपुत्रदेवकन्यानां बोधिचित्तमधिमुच्यध्वं । एवं हि स्यात तथागतकृतज्ञाः, सर्वसत्त्वोपजीव्याःs । ततस्ता अप्सरसो लिच्छवेर्विमलकिर्तेः पादौ शिरसाभिवन्द्य, मारेण सह प्रत्यगच्छन् । भगवन्, लिच्छवेर्विमलकीर्तेस्तद्विकुर्वणविशेषणं दृस्त्वा, एतस्मात्.....नोत्सहे" । अथ भगवंश्रेस्थिपुत्रं सुदत्तं आमन्त्रयते स्म "कुलपुत्र. ..... गच्छ " । सुदत्तः पुनरवोचत् "भगवन्, ... नोत्सहे .... । " एकस्मिन्समये मां मत्पितृनिवेशने महायज्ञकरणार्थाय सर्वश्रमणब्राह्मणेभ्यः सर्व दरिद्रदुःखितकृपणवनीयकविह्वलीभूतेभ्यः सप्तदिवसं दानं ददं, तस्मिन्महायज्ञकरणे

sन्तिमदिवसे लिच्छविर्विमलकीर्तिस्ताम्महायज्ञभूमिमुपसंक्रम्य, एतदवदीत्sश्रेस्थिपुत्र, यथा त्वं यज्ञं करोषि तथा हि यज्ञं मा कुरुः, धर्म यज्ञं कुरु । अलं त आमिषयज्ञेन । तमेतदवदं तद्धर्मयज्ञं कथं देयम्?s

"स मामब्रवीत्sयेन केन धर्म यज्ञेनापूर्वमचरमं सत्त्वा परिपच्यन्ते, तधि धर्म यज्ञं । तदपि किं? यदुत बोधिव्युपहारस्य महामैत्रि, सद्धर्मसंग्रहेणाभिनिर्हृता महाकरुणा, सर्वसत्त्वप्रामोद्यपलम्भेनाभिनिर्हृता महामुदिता, ज्ञानसंग्रहेणाभिनिर्हृता महोपेक्षा

ssशान्तिदमेनाभिनिर्हृता दानपारमिता, दुःशीलसत्त्वपरिपाचनेनाभिनिह्रिर्रता शीलपारमिता, नैरत्म्यधर्मेणाभिनिर्हृता क्षान्तिपारमिता, बोध्यारम्भेणाभिनिर्हृता वीर्यपारमिता, कायचित्तविवेकेनाभिनिर्हृता ध्यानपारमिता, सर्वज्ञज्ञानेनाभिनिर्हृता प्रज्ञापारमिता "s सर्वसत्त्वपरिपाचनेनाभिनिर्हृता शून्यताभावना, संस्कृतपरिशोधनेनाभिनिर्हृतानिमित्तभावना, संचित्योपपत्त्याभिनिर्हृताप्रणिहितभावना

"s सद्धर्मपर्युद्ग्रहणेनाभिनिर्हृतो बलपराक्रमः, संग्रहवस्तुनाभिनिर्हृतं जीवितेन्द्रियम्, सर्वसत्त्वभृत्यशिष्यभवेनभिनिर्हृता निर्माणता, असरात्सारोपादानेनाभिनिर्हृतः कायजीवभोगलाभाः, षडनुस्मृत्याभिनिर्हृत स्मृतिः, संमोदनीयधर्मेणाभिनिर्हृत आशयः, सम्प्रतिपत्याभिनिर्हृताजीवपरिशुद्धिः, श्रद्धाप्रामोद्यसेवनेनाभिनिर्हृतमार्यपर्युपासनम्, अनार्याप्रतिघेनाभिर्हृतोऽध्याशयः, प्रतिपत्याभिनिर्हृतं श्रवणकौशल्यम्, अरणाधर्मावबोधेनाभिनिर्हृत आरण्यावासः, बुद्धज्ञानप्रतिलाभेनाभिनिर्हृतं प्रतिसंलयनम्, सर्वसत्त्वक्लेशविमुक्तियोगेनाभिनिर्हृता योगाचाराभूमिः

"sलक्षणानुव्यञ्जनबुद्धक्षेत्रालङ्कारसत्त्वपरिपाचननेनाभिनिर्हृतः पुण्यसम्भार, सर्वधर्मेष्वनुपादेयाहेयैकनयज्ञानेनाभिनिर्हृतः प्रज्ञासम्भारः, सर्वक्लेशावरणाकुशलधर्मप्रहाणेनाभिनिर्ह्&#६१७८३;रितः सर्वकुशलमूल सम्भारः, सर्वज्ञज्ञानाधिगमेन च कुशलधर्मेण चाभिनिर्हृतः सर्वबोधिपक्षधर्मसमुत्पादः तधि, कुलपुत्र, धर्मयज्ञं । तस्मिन्धर्मयज्ञे प्रतिष्ठितो बोधिसत्त्वो यज्ञदायकः, यज्ञसुकारक, सदेवके लोके भवति दक्षिणीयःs ।

" भगवन्, तस्मिन्गृहपताविममेवंनिर्देशं देशितवति, तस्या ब्राह्मण परिषदो ब्राह्मणानां द्विशतानामनुत्तरसम्यक्सम्बोधिचित्तमुत्पन्नं ।

"अहमपि श्राद्ध आश्चर्यप्राप्तः सत्पुरुषस्य पादावभिवन्द्य,मत्कण्ठादवतार्य शतसहस्रमूल्यं मुक्ताहारमनुप्रयच्छामि स्म । स न प्रतीच्छति स्म । अथ खल्वहमेतदवोचम्s प्रतिगृहाण त्वमिं मुक्ताहारं, यं चाधिमुच्यसे तस्मै देहीs ति । स तं मुक्ताहारं प्रतिगृह्य च द्वौ प्रत्यंशौ कृत्वा चैकं प्रत्यंशं तस्मिन्यज्ञस्थाने सर्वलोकनिन्दितेभ्यो नगरदरिद्रेभ्यो ददाति स्म; द्वितियं प्रत्यंशं दुष्प्रसहाय तथागताय निर्यातयामास । एवं रूपं प्रातिहार्यं दर्शयति स्म, यथा सर्वाभिः पर्षद्भिर्मरीचिर्नाम लोकधातुर्दुष्प्रसहो नाम तथागतश्च दृश्येते स्म । स च मुक्तहार स्तस्य दुष्प्रसहस्य तथागतस्य मुर्ध्निमुक्ताहार्कूटागारः संस्थितोऽभूच्चतुरस्रश्चतुःस्थूणः समभागः सुविभक्तो दर्शनीयो विचित्रः ।

"स एवं रूपं प्रातिहार्यं दर्शय्य, वचनमेतदवोचत् "ऽ दायको यो दानपतिर्यथा तथागतं, तथा नगरदरिद्रान्दक्षिणीयान्सञ्जानाति चासंभिन्नं सममहाकरुणाचित्तेन विपाकप्रतिकाङ्क्षी परित्यागी, स हि धर्म यज्ञ परिनिष्पन्नऽ इति ।

"अथ ते नगरदरिद्रास्तत्प्रातिहार्यं दृष्त्वा, तं धर्मोपदेशमपि श्रुत्वा, अनुत्तरसम्यक्सम्बोधिचित्तमुत्पादयन्ति स्म । भगवन्, एतस्मात्कारणात्तस्य सत्पुरुषस्य रोगपृच्छनगमन्नोत्सहे " ।

तथा हि सर्वे ते बोधिसत्त्वा महासत्त्वा अपि, या तेन सत्पुरुषेण सहावकाशकथा" ये ननोपदेशा उक्ताः तत्सर्वं देशयन्तो गमन्नोत्सहन्ते स्म ।

श्रावकबोधिसत्त्वप्रेषणोक्तस्य परिवर्तस्तृतीयः ।

४ ग्लानसंमोदन (कथा)

ततो भगवान्मंजुश्रीं कुमारभूतमामन्त्रयते स्म "मंजुश्रीः, लिच्छवेर्विमलकीर्ते रोगपृच्छनाय गच्छ" । मंजुश्रीरप्यवोचत्

"भगवन्, लिच्छविर्विमलकीर्तिर्दुरासदो गम्भीरनये प्रतिभानप्रतिपन्नः, व्यत्यस्तपदपुष्कलपदनिष्पादनकुशलः, अनाच्छेद्यप्रतिभानस्सर्वसत्त्वेष्वप्रतिहतबुद्धिसमर्पितः, सर्वबोधिसत्त्वकर्मनिर्यातः, सर्वबोधिसत्त्वप्रत्येकबुद्धगुह्यस्थाने सुप्रतिपन्नस्सर्वमारस्थानविनिवर्तकुशलः, महाभिज्ञाविक्रीडित उपायप्रज्ञानिर्यातोऽद्वयधर्मधात्वसंभेदगोचरस्य वराग्रप्राप्तो धर्मधात्वेकव्यूहानन्ताकारव्यूहधर्मदेशनाकोविदः, सर्वसत्त्वेन्द्रियसम्प्रापकव्यूहज्ञो विचक्षणः, उपायकौशल्यगतिगतः प्रश्ननिर्णयप्रतिलब्धः । स परीत्तवर्मसन्नाहसन्तोषस्यासमर्थः, कि तु बुद्धाधिष्ठानेन तेन गतो यथाभूतं यथानुभावं भाषितुकामो(ऽस्मि)" ।

अथ तस्यां परिषदि तेषां बोधिसत्त्वमहाश्रावकशक्रब्रह्मलोकपालानां च देवपुत्राप्सरसामेतभूत् "(यत्र) मंजुश्रीः कुमारभूतश्चा सत्पुरुषस्तावुभावभिलापिनौ, तत्र महाधर्मकीर्तिकथा नियतं भविष्यती" ति । ततो बोधिसत्त्वानां लक्षं श्रावकाणांच पञ्चशतमात्रं बहुशक्रब्रह्मलोकपालाश्च बहुशतसहस्राणी देवपुत्राणांच धर्मश्रवणार्थं मंजुश्रियः कुमारभूतस्य पृष्ठितोऽगच्छन् । अथ मंजुश्रीः कुमारभूतः सर्वैस्तैर्बोधिसत्त्वमहाश्रावकशक्रब्रह्मलोकपालदेवपुत्रैः परिवृतः पुरस्कृतो वैशालीम्महानगरीं प्रविशति स्म ।

ततो लिच्छवेइविमलकीर्तेरेतदभूत "मंजुश्रीः कुमारभूतश्च बहुपरिवार आगच्छन्ति; तेनेदम्मे गृहमधिष्ठा(नेन) शून्यं (भवत्व्)" इति । (ततः) तद्गृहं शून्यं अध्यतिष्ठत् । तत्र द्वारिकोऽपि नाभवत् । मंचो यस्मिन्विमलकीर्तिग्लानः शायी, आसीदेकासनं । तं स्थापयित्वा तत्र मंचो वा पीठिका वासनं किञ्चिन्नादृश्यत ।

अथ मंजुश्रीः सपरिवारो येन विमलकीर्तेरावासस्तेनागच्छत्; उपसंक्रम्य च प्रविश्य, तद्गृहं शून्यमद्राक्षीत् । तत्र द्वारिकोऽपि नाभवत् । तस्मात्, (यस्मिन्) विमलकीर्तिः शाय्यासीत्, एकाकिमंचागन्यमञ्चं पीठिकं वासनं वा नाद्राक्षीत् । ततो लिच्छविर्विमलकीर्तिर्मजुश्रियं कुमारभूतमदर्शत्; दृष्ट्वैदवोचत् "मंजुश्रीः, एहि स्वागतः, मंजुश्रीः, एहि सुस्वागतः । पूर्वमनागतोऽदृष्टोऽश्रुतो दृश्यसे" । मंजुश्रीरब्रवीत् "गृहपते, यथा वदसि तथा यदागतम्, तधि पुनर्नागच्छति । यद्गतं तदपि पुनर्न गच्छति । तत्कस्य हेतोः? अनागत आगमोऽपि न प्रज्ञायते, गतेऽपि गमनन्न प्रज्ञायते, यत्कारणाद्यद्दृष्टम्, तत्पुनरपि द्रष्टव्यन्नास्ति ।

"कच्चित्ते, सत्पुरुष, क्षमणीयं, कच्चिद्यापनीयं, कच्चित्ते धावतो न क्षुभ्यन्ते, कच्चिदद्दुःखा वेदनाः प्रतिक्रामन्ति नाभिक्रामन्ति? भगवानपि ऽननु तुभ्यमल्पाबाधता, अल्पातंकता, अल्पातुरः लघूत्थानतापि, यात्राबलसुखानवद्य (ता) सुखस्पर्शविहार(ते)ऽ त्यख्यत् । गृहपते, अयं ते रोगः कस्मादुत्पन्नः? उत्पन्नः कियच्चिरं? किमाश्रितः? कदा शाम्यति?"

विमलकीर्तिरवोचत् "मंजुश्रीः, अविद्या च भवतृष्ण यावत्, तावदयम्मे रोगोऽपि । यावत्सर्वसत्त्वानां रोगः, तावदपि मे रूगः । यदा सर्वसत्त्वा वीतरोगाः, तदा रोगो ममापि न सम्भवति । तत्कस्य हेतोः? मंजुश्रीः, बोधिसत्त्वस्य संसारस्थानं हि सत्त्वाः); रोगो हि संसारस्थानं । यदा सर्वसत्त्वा वीतरोगाः, तदा बोधिसत्त्वोऽप्यरोगो भवति ।

"मंजुश्रीः, तद्यथापि नाम श्रेष्ठिन एकपुत्रो ग्लानो भवेत्; तद्वाधकारणादुभावपि मातापितरौ ग्लानौ भवतः । यावत्स एकपुत्रोऽरोगोऽभूतः, तावदुभावपि मातापितरौ दुःखितौ भवतः । मंजुश्रीः, एवमेव बोधिसत्त्वः सर्वसत्त्वेष्वेकपुत्र इव प्रियः; सर्वसत्त्वेषु ग्लानेषु सोऽपि ग्लानो भवति । सत्त्वे (ष्व्) अरोगे (षु), सोऽप्यग्लानः । यदपि, मंजुश्रीःऽअयं ते रोगः कस्मादुत्पन्न?ऽ इति वदसिबोधिसत्त्वानां हि रोगो महाकरुणायाः सन्भवति" ।

मंजुश्रीरवोचत् "गृहपते, किमस्मिंस्ते शून्यागारे न कश्चित्परिवारोऽस्ति?"अब्रवीत् "मंजुश्रीः, सर्वबुद्धक्षेत्राण्यपि शून्यानि" । अभाषत "केन शून्यानि?"आह "शून्यतया शून्यानि" । अभाषत "शून्यतायां शून्यं कीम्?" आह "सङ्कल्पो हि शून्यता शून्यः" । अभाषत "शून्यता कि सङ्कल्पायासमर्था?" आह "तस्मिन्परिकल्पे शून्ये, शून्यता हि शून्यतायां निर्विकल्पा" । अभाषत "गृहपतेऽ शून्यता यत्रान्वेष्टुं (युज्जते)?" आह "मंजुश्रीः, शून्यतान्वेष्टुं (युज्जते) द्विषष्टिदृष्टिगतेभ्यः" । अभाषत "द्विषष्टोदृष्टिगतानि कुतोऽन्वेष्टुं (युज्यते)?" आह "तान्यन्वेष्तुं (युज्जते) तथागतस्य विमुक्त्याः" । अभाषत "इयं तथागतस्य विमुक्तिः कुतोऽन्वेष्टुं (युज्यते)?" आह "अन्वेष्टुं (युज्यते) सर्वसत्त्वानां प्रथमचित्तचर्यायाः ।

"मंजुश्रीः यत्ऽकिन्ते न कश्चित्परिवारोऽस्ती?ऽ ति वदसि सर्वमाराश्च सर्वपरप्रवादिनः सन्ति मे परिवारः । तत्कस्य हेतोः? मारा हि संसारस्य वर्णवादिनः, संसारश्च बोधिसत्त्वस्य परिवारः । परप्रवादिषु दृष्टिगतानां वर्णवादोइषु, बोधिसत्त्वः सर्वदृष्टिगतेभ्योऽनिंज्यः । तस्मात्सर्वमाराश्च सर्वपरप्रवादिनो मम परिवारः" ।

मंजुश्रीरभाषत "गृहपते, रोगस्ते कीदृशः?" आह "आरुप्योऽसनिदर्शनः" । अभाषत "स रोगः किं कायाप्रतिसंयुक्त आहोस्विच्चित्तप्रतिसंयुक्तः?" आह "कायविवेकतया (स) कायप्रतिसंयुक्तो नास्ति, चित्तमायाधर्मतया चित्तप्रतिसंयुक्तो नास्ति" । अभाषत "गृहपते, एषां चतुर्णा, यदिदम्पृथिव्यप्तेजोवाय्वाकाशधातूनाम्, को धातुर्हन्यते?" आह "मंजुश्रीः, यः कश्च सर्वसत्त्वानां रोगधातुः, तेनाहमपि ग्लानः । मंजुश्रीः, कथं बोधिसत्त्वेन ग्लानो बोधिसत्त्वः सम्मोद्पनीयः?"

मंजुश्रीरभाषत "कायोऽनित्य इति(संमोदपनीयः), न हि निर्विद्विरागेन । कायो दुःख इतिनिर्वाणरसेन हि न (संमोदपनीयः) । कायो नैरात्म्य इतिअथ च पुनः सत्त्वपरिपाचनेन (संमोदपनीयः) । कायः शान्त एवेतिकिन्तूपशमेन (संमोदपनीयो) नास्ति । सर्वदुश्चरितुपनीते, संक्रान्त्या न (संमोदपनीयः) । स्वातुरेणान्येशु ग्लानेषु सत्त्वे(षु)कारुण्यपूर्वान्तपर्यान्त दुःखानुस्मृतिसत्त्वार्थ कार्यानुस्मृतिकुशलमूलसाक्षात्कारादिविशुद्ध्यतृष्णानित्योद्योगं समारभ्य, सर्वरोगाभावकारणभैषज्यराजो भवेदिति । तथा हि बोधिसत्त्वेन ग्लानो बोधिसत्त्वः संमोदपनीयः" । मंजुश्रीरभाषत "कुलपुत्र, ग्लानेन बोधिसत्त्वेन कथं स्वचित्तं निध्यायितव्यम्?"

विमलकीर्तिराह "मंजुश्रीः, ग्लानेन बोधिसत्त्वेन हि स्वचित्तमेवं निध्यायितव्यम्व्याधिः पूर्वान्ताभूतविपर्यासकर्मपर्युत्थानान्निश्चरति । अभूतसंकल्पक्लेशोत्पन्नो य आतुरो नाम धर्मः, त(स्य) परमार्थत इह न किंचिदुपलभ्यते । तत्कस्य हेतोः? अयं कायश्चतुर्महाभूतेभ्यो भूतः; एषु धातुषु कश्चदधिपतिर्वा जनको वा नास्ति । अस्मिन्कायेऽनात्मके, आत्माभिनिवेशं स्थापयित्वा, इह परमार्थतो यो रोगो नाम सोऽनुपलम्भः; तस्मादात्मनि हयभिनिवेशेऽसति, रोगमूलाज्ञायां विहरितव्यमिति; तेन, आत्मसंज्ञायां प्रतिप्रस्रब्धायां, धर्मसंज्ञोत्पादयितव्या ।

"अयं हि कायोऽनेकधर्मसंनिपातः; उत्पद्यमानो धर्मा एवोपद्यन्ते; निरुध्यमानो धर्म एव निरुध्यन्ते । धर्माः परस्परन्न वेदयन्ति न जानन्ति । ते धर्मा उत्पत्त्यामेवम्sअहमुपपद्यs इतिन चिन्तयन्ति; निरोधऽप्येवम्sअहन्निरिध्यs इतिन चिन्तयन्ति ।

"तेन धर्मसंज्ञाज्ञाकरणार्थ चित्तमुत्पादयितव्यम्sयन्मयैवं धर्मेषु संज्ञायते, तदपि विपर्यासः । विपर्यासो हि महारोगः । मया रोगविसंयोगः करणीयः, व्याधिप्रहाणायोद्योगः करणीयःs । तत्र तद्व्याधिवर्जनं किम्? यदुताहंकारममकारवर्जनं । तदहंकारममकारवर्जनं किम्? यदुतदेवयविसंयोगः । तत्रा ध्यात्मबहिर्धासमुदाचाराभावः किम्? यदुतसमताया अचलं, स्वचलं, व्यचलं । "समता किम्? मत्समताया यावन्निर्वाणसमतां । तत्कस्य हेतोः? यदिदम्मन्निर्वाणयोरुभयोरपि शून्यताकारणात् । ताभुबौ केन शून्यौ? नामव्यवहारोभौ शून्यौ; तस्मात्तावपरिनिष्पन्नौ । तथा हि तेन समतादर्शनेन रोग एवानन्यः । शून्यतान्यथाकारेऽसति, रोग एव शून्यता ।

"वेदना निर्वेदन द्रष्टव्या । तेन वेदनानिरोधो न साक्षात्करणीयः । परिसमाप्तबुद्धधर्म उभे वेदने उत्सृजेत्, किं तु सर्वदुर्गतिसत्त्वेषु महाकरुणानुत्थापनन्नास्ति; तथा हि करणीयं, यथैषु सत्त्वेषु योनिशो निध्यप्त्या व्याधिर्निराकृतो भवति ।

"एषु (सत्त्वेषु) कश्चिद्धर्मो नोपसंहर्तव्यो वा निराकरणीयो वा । तदाधारपरिज्ञानार्थ, यस्माद्रोग उत्पन्नः, तेषु धर्मो देशयितव्यः । स आधारः किम्? यदिदमध्यालम्बनं आधारः । अध्यालम्बनाधारे यावदालमम्बनम्, तावद्रोगाधारः । कस्मिनध्यालम्बनम्? त्रैधातुकाध्यालम्बनं । अध्यालम्बनाधारपरिज्ञा किम्? यदुतनालम्बनं चानुपलब्धिः । यानुपलब्धिस्तध्यनध्यालन्बनं । अनुपलब्धिः किम्? यदिदमात्मदृष्टिश्च परदृष्टिःउभे दृष्टी नोपलभ्येते । अतोऽनुपलब्धिर्नामोच्यते ।

"मंजुश्रीः, आतुरेण तथा हि बोधिसत्त्वेन जराव्याधिमरणजातिवर्जनाय स्वचित्तं निध्यायितव्यं । मंजुश्रीः, बोधिसत्त्वानांरोग एवं रूपः । यद्येवन्न भवेत्, व्यवसायो निरार्थकोऽभविष्यत् । तद्यथापि नाम प्रत्यर्थिकोपघातेन वीरो नामोच्यते, एवमेव जराव्याधिमरणदुःखशमनेन बोधिसत्त्वो नामोच्यते ।

"तेन ग्लानेन बोधिसत्त्वेनैवं ऽयथा मम रोगोऽभूतोऽसन्, तथा हि सर्वसत्त्वानां रोगोऽप्यभूतोऽसन्ऽ इत्युपलक्षितव्यं । एवं प्रेक्षमाणः सोऽनुशंसदर्शनाभ्रष्टः सत्त्वेषु महाकरुणामुत्पादयति, (अन्यत्) स्थापयित्वा चागन्तुकक्लेशप्रहाणाय सत्त्वेष्वभियोगमहाकरुणामुत्पादयति । तत्कस्य हेतोः? अनुशंसदर्शनपतितया महाकरुणया हि जातिषु बोधिसत्त्वो निर्विद्यते । अनुशंसदर्शनपर्युत्थानापगतया महाकरुणा बोधिसत्त्वो जातिषु न निर्विद्यते । दृष्टिपर्युत्थाने समुत्तिष्ठति, स न जायते । चित्तपर्युत्थानापगतो जायमानः स मुक्त इव जायते, स मुक्त इवोत्पद्यते । मुक्त इव जायमानो मुक्त इवोत्पद्यमानो बुद्धसत्त्वबन्धनमुक्तिधर्मदेशनायै समर्थश्च प्रतिबलो भवति । यदिदं भगवताआत्मना बद्धेन परं बन्धनाद्विमोचयेत्, तधि स्थानन्न विद्यते । आत्मना मुक्तेन परं बन्धनाद्विमोचयेत्, तत्स्थानं विद्यतैति भाषितं । तस्माद्बोधिसत्त्वो मुक्त्यै कुर्यान्न बन्धनाय ।

"तत्र बन्धनं किम्? किम्मुक्तिः? अनुपाये भवमुक्तिपरिग्रहो बोधिसत्त्वस्य बन्धनं । उपायेन भवप्रवृत्त्यवक्रांतिर्मुक्तिः । अनुपायेन ध्यानसमाधिसमापत्त्यास्वादो बोधिसत्त्वस्य बन्धनं । उपायेन ध्यानसमाध्यास्वादो मुक्तिः । उपायेनानुद्दिष्ट प्रज्ञा हि बन्धनं । उपायेन निष्ठितप्रज्ञाः मुक्तिः । प्रज्ञानुद्दिष्टोपायो बन्धनं । प्रज्ञया निष्ठितोपायो मुक्तिः ।

"तत्रोपायानुद्दिष्टप्रज्ञाबन्धनं किम्? यदुतशून्यतानिमित्ताप्रणिहितनिध्यप्तिश्च लक्षणानुव्यंजन बुद्धक्षेत्रालंकारसत्त्वपरिपाचनानिध्यप्तिहर्युपायानुद्दिष्टप्रज्ञा च बन्धनं । तत्रोपायनिष्ठितप्रज्ञामुक्तिः किम्? यदुतलक्षणानुव्यंजनबुद्धक्षेत्रालङ्कारसत्त्वपरिपाचनचित्तनिध्यप्तिश्च शून्यतानिमित्ता प्रणिहितपरिजयकरणम्, इदं हयुपायनिष्ठितप्रज्ञा च मुक्तिः । तत्र प्रज्ञानुद्दिष्टोपायबन्धनं किम्? यदिदंसर्वदृष्टिक्लेशपर्युत्थानानुशयानुनयप्रतिघावस्थितस्य सर्वकुशलमूलव्यापारबोध्यपरिणामना हि प्रज्ञानुद्दिष्टोपायश्च बन्धनं । तत्र प्रज्ञानिष्ठितोपायमुक्तिः किम्? यदिदम् तया सर्वदृष्टिक्लेशपर्युत्थानानुशयानुशयानुनयप्रतिघपरिवर्जकस्य
सर्वकुशलमूलव्यापारबोधिपरिणामनयापरामृष्टिः, सा हि बोधिसत्त्वस्य प्रज्ञानिष्ठितोपायश्च मुक्तिः ।

"मंजुश्रीः, तत्र ग्लानेन बोधिसत्त्वेनैवं तेषु धर्मेषु निध्यायितव्यंयः कायचित्तरोगेऽनित्यतादुःखशून्यननैरात्म्यसंबोधः, स तत्प्रज्ञा । यः कायस्य रोगविवर्जनेनानुत्पाद्श्च संसारास्रंसने सत्त्वार्थप्रयोगानुयोगः, अयं हि तदुपायः । भूयोऽपि यःऽकायचित्तरोगाः परस्परं परंपरया न च नवा न च जीर्णा (इत्य्) अवबोधः, स तत्प्रज्ञा । यच्च कायचित्तरोगोपशमनिरोधयोरनुत्थापनं, तत्तदुपायः ।

"मंजुश्रीः, तथा हि ग्लानेन बोधिसत्त्वेन स्वचित्तं निध्यायितव्यम्; किं तु तेन निध्यप्त्यनिध्यप्त्योर्न बिहरितव्यं । तत्कस्य हेतोः? यदि निध्यप्त्यां बिहरेत्, स हि पृथग्जनस्य धर्मः । अथानिध्यप्त्यां बिहरेत्, स श्रावकधर्मः । तस्माद्बोधिसत्त्वेन निध्यप्त्यनिध्यप्त्योर्न विहरितव्यं । यत्तत्राप्रतिष्ठितं, तद्वोधिसत्त्वगोचरः ।

"यः पृथग्जनगोचरश्चार्यगोचरश्च नास्ति, स हि बोधिसत्त्वगोचरः । यः संसारगोचरेऽपि क्लेशगोचरस्तु नास्ति, स बोधिसत्त्वस्य गोचरः । यो निर्वाणावबोधगोचरेऽप्यत्यन्तपरिनिर्वाणगोचरस्तु नास्ति, स बोधिसत्त्वस्य गोचरः । यश्चतुर्मारदेशनागोचरेऽपि सर्वमारविषयसमतिक्रान्तगोचरः, स बोधिसत्त्वस्य गोचरः । यः सर्वज्ञज्ञानैषणागोचरेऽप्यकालज्ञानप्राप्तिगोचरस्तु नास्ति, स हि बोधिसत्त्वस्य गोचरः । यश्चतुःसत्यज्ञानगोचरेऽप्यकालसत्यप्रतिपादनगोचरस्तु नास्ति, स हि बोधि सत्त्वस्य गोचरः । योऽध्यात्मप्रत्यवेक्षणगोचरेऽपि संचिन्त्यभवप्रतिकांक्षिपरिग्रहगोरस्तु नास्ति, स बोधिसत्त्वस्य गोचरः । योऽनुत्पादप्रत्यवेक्षणगोचरऽपि नियतप्राप्त्यवक्रान्तिगोचरस्तु नास्ति, स बोधिसत्त्वस्य गोचरः । यः प्रतीत्यसमुत्पादगोचरेऽपि सर्वदृष्टिविष्यगोचरस्तु नास्ति, स बोधिसत्त्वस्य गोचरः ।
यः सर्वसत्त्वसंसर्गगोचरेऽपि क्लेशानुशयगोचरस्तु नास्ति, ...पे ।
यो विवेकगोचरेऽपि कायचित्तक्षयस्थानगोचरस्तु नास्ति, ...पे ।
यस्त्रैधातुकगोचरेऽपि धर्मधातुव्यवच्छेदकरणागोचरस्तु नास्ति, ...पे ।
यः शून्यतागोचरेऽपि गूणसर्वथैषणागोचरस्तु, ...पे ।
योऽनिमित्तगोचरेऽपि प्रमोचयितव्य सत्त्वावलम्बनव्यवसायगोचरस्तु, ...पे ।
योऽप्रणिहितगोचरेऽपि संचिन्त्यभवगतिदर्शनगोचरस्तु, ...पे ।
योऽनभिसंस्कारगोचरेऽपि सर्वकुशलमूलाभिसंस्कारास्रंसनगोचरस्तु, ...पे ।
यः षट्पारमितागोचरे सर्वसत्त्वचित्तचर्यापारायणगोचरः, ... पे ।
यः षडभिज्ञागोचरेऽपि क्षीणाअस्रवगोचरस्तु नास्ति, ...पे ।
यः सद्धर्मस्थानगोचरे कुमार्गानुपलब्धिगोचरः, ...पे ।
यश्चतुरप्रमाणगोचरेऽपि ब्रह्मलोकजात्यसंसर्गगोचरेस्तु, ...पे ।
यः षडनुस्मृतिगोचरे सर्वास्रवगोचरो नास्ति, ...पे ।
यो ध्यानसमाधिसमापत्तिगोचरेऽपि समाधिसमापत्तिवशेनानुत्पादगोचरस्तु, ...पे ।
यः स्मृत्युस्थानगोचरेऽपि कायवेदनाचित्तधर्मातिरेकगोचरस्तु नास्ति, ...पे ।
यः प्रधान गोचरे कुशलाकुशलद्वयालम्बनगोचरो नास्ति, ...पे ।
य ऋद्धिपादनिर्हारगोचरेऽप्यनाभोगर्द्धिपादवशगोचरः, ...पे ।
य पंचेन्द्रियगोचरे सर्वसत्त्वेन्द्रियवरावरज्ञानगोचरः, ...पे ।

यः पंचबलावस्थानगोचरे तथागतस्य दशबलाभिरतिगोचरः, ...पे
यः सप्तबोध्यंगपरिनिष्पन्नगोचरे बुद्धिप्रविचयज्ञानकौशल्यगोचरः, ...पे ।
यो मार्गाश्रयगोचरेऽपि कुमार्गानुपलब्धिगोचरस्तु, ...पे ।

यः शमथविपश्यनासमग्रारम्भगोचरेऽप्यत्यन्तोपशमापतनगोचरस्तु, ...पे ।

यः सर्वधर्मानुत्थापनलक्षणावबोध्गोचरेऽपि लक्षणानुव्यञ्जनबुद्धकायविभूषणसमुत्थापनतागोचरस्तु, ...पे ।

यः श्रावकप्रत्येकबुद्धचारित्र दर्शनगोचरेऽपि बुद्धधर्मानपायिव्यापारगोचरस्तु, ...पे ।
यः सर्वस्वभावात्यन्तविशुद्धतापन्नधर्मानुगमनगोचरेऽपि सर्वसत्त्व(नां) यथाधिमुक्ति तथेर्याक़्पथदर्शनागोचरस्तु, ...पे ।

यः सर्वबुद्धक्षेत्रात्यन्तविनाशाविष्करणापगताऽकाशस्वभावाधिगमगोचरे ननाव्युहा नेकव्युहबुद्धक्षेत्रगुणव्युय्हदर्शनागोचरः, ...पे ।

यः सद्धर्मचक्रप्रवर्तनमहापरिनिर्वाणासंदर्शनगोचरश्च बोधिसत्त्वचर्या अत्यजनगोचरश्च, अयमपि बोधिसत्त्वस्य गोचरः" ।

अस्मिनुपदेशे निर्दिश्यमाने, तेषां मंजुश्रीया कुकारभूतेन सार्धमागतानां देवपुत्राणामष्तसहस्रैरनुत्तरसम्यक्सम्बोधिचित्तमुत्पादितं ।

ग्लानसंमोदन कथायाः परिवर्तश्चतुर्थः ।

५ अचिन्त्यविमोक्षनिर्देशः

अथायुष्मतः शारिपुत्रस्यैवं भवति स्मऽयद्यस्मिन्गृह आसनान्यपि न स्युः, इमे बोधिसत्त्वाश्च महाश्रावकाः कुत्र निषीदन्ति?ऽ ततो लिच्छविर्विमलकीर्तिरायुष्मतः शारिपुत्रस्य चित्तवितर्क ज्ञात्वा, आयुष्मन्तं शारिपुत्रमेवमवोचत्

"भदन्त शारिपुत्र, कि धर्मार्थिक आगतोऽसि? आहोस्विदासनार्थिकः?" आह "धर्मार्थिक आगतः, नास्म्यासनार्थिकः" । अवोचद् "भदन्त शारिपुत्र, यद्यतो यो धर्मार्थिकः सोऽपि स्वकायार्थिको न स्यात्, आसनछन्दीक्षणं कुत आगतम्? भदन्त शारिपुत्र, यो धर्मकामः, स हि रूपवेदनासंज्ञासंस्कारविज्ञानकामो नास्ति, स्कन्धधात्वायतनकामो नास्ति । यो धर्मकामः, स कामरूपारूप्यधातुकामो नास्ति, । यो धर्मकामः, स बुद्धभिनिवेशकामो नास्ति, धर्मसंघाभिनिवेशकामो नास्ति ।
"भदन्त शारिपुत्र, पुनरपरं यो धर्मकामः, स दुःखपरिज्ञानकामो नास्ति, समुदयप्रहाणकामो नास्ति, निरोधसाक्षात्कारकामो नास्ति, मार्गभावनाकामो नास्ति । तत्कस्य हेतोः? धर्मो हयप्रपञ्चऽनक्षरः; ततो

यद्ऽदुःखं परिज्ञातव्यम्, समुदायः प्रहातव्यः, निरोधः साक्षात्कर्तव्यः, मार्गो भावयितव्यऽ इत्युत्तरिकरणीयं, तद्धर्मकामो नास्ति, तधि प्रपञ्चकामः ।
"भदन्त शारिपुत्र, धर्मो ह्युपशान्तश्च प्रशान्तः, ततो य उत्पादविनाशनसमुदाचारः, स धर्मकामो नास्ति, विवेककामो नास्ति; स उत्पादविनाशकामः । भदन्त शारिपुत्र, पुनरपरं धर्मोऽ रजो विरजः; ततः कश्चिद्धर्मश्चेद्यस्मिननुनयस्(स्याद्) अन्तमशो निर्वाणेऽपि, स हि धर्मकामो नास्ति; सऽरागरजः कामःऽ । धर्मो विषयो नास्ति । या विषयगणना, सा धर्मकामो नास्ति; स विषयकामः । धर्मो ह्यनाव्यूहोऽनिर्व्युहः; कश्चिद्धर्मो यस्मिनभिग्रहणं चोत्सर्गः, स धर्मकामो नास्ति; स ह्यभिग्रहणोत्सर्गकामः ।

"धर्मोऽनालयः; य आलयारामाः, ते न धर्मकामाः, ते ह्यालयकामाः । धर्मोऽनिमित्तः शून्यः; येषां विज्ञाननिमित्तानुगमनम्, ते न धर्मकामाः, ते निमित्तकामाः । धर्मोऽसहवासः; ये केचिद्धर्मेण सह विहरन्ति, ते न धर्मकामाः, ते विहारकामाः । धर्मो दृष्टश्रुतमतविज्ञातन्नास्ति; ये दृष्टश्रुतमतविज्ञाते चरन्ति ते दृष्टश्रुतमतविज्ञातकामाः, न तु धर्मकामाः ।

"भदन्त शारिपुत्र,, धर्मस्संस्कृतासंस्कृतन्नास्ति; ये संस्कृतावचराः ते न धर्मकामाः, ते संस्कृरग्रहणकामाः । भदन्त शारिपुत्र, अत इच्छेश्चेद्धर्म, त्वया सर्वधर्मा अप्रतिकांक्षितव्याः" ।

अस्मिन्धर्मोपदेशे निर्दिश्यमाने, देवपुत्राणां पञ्चशत(स्य) धर्मेषु विशुद्धं धर्मचक्षुरुदपादि । अथ लिच्छविर्विमलकीर्तिर्मञ्जुश्रीकुमारभूतमब्रवीत् "मंजुश्रीः, दशदिक्षु शतसहस्राण्यसंख्येयानि बुद्धक्षेत्राणि बुद्धक्षेत्रचारिकां चरित्वा, कस्मिन्बुद्धक्षेत्रे सर्वोत्तमानि सर्वगुणसम्पन्नानि सिंहासनानि त्वया दृष्टानि?" एवमवोचत् ।

मंजुश्रीकुमारभूतो लिच्छवि बिमलकीर्तिमेतदवोचत् "कुलपुत्र, इतः पूर्वास्मिन्द्वात्रिशद्गङ्गानदीवालुकासमानि बुद्धक्षेत्राण्यतिक्रम्य, अस्ति मेरुध्वजो नाम लोकधातुः । तत्रमेरुप्रदीप राजो नाम तथागतस्तिष्ठिति ध्रियते यापयति । तस्य तथागतस्य काय(प्रमाणं) चतुरशीतियोजनशतसहस्राणी । तस्य भगवतस्सिंहानप्रमाणमष्टषष्टियोजनशतसहस्राणि । तेषां बोधिसत्त्वानां काय(प्रमाणम्) अपि द्विचत्वारिंशद्योजनशतसहस्राणि । तेषां बोधिसत्त्वानां सिंहासन(प्रमाणम्) अपि चतुर्त्रिशद्योजनशतसहस्राणि । कुलपुत्र, तस्मिंस्तस्य मेरुप्रदीपराजस्य तथागतस्य बुद्धक्षेत्रे मेरुध्वजे लोकधातौ सिंहासनानि सन्ति सर्वोत्तमानि सर्वगुणसम्पन्नानि" ।

ततस्तेन खलु समयेन तादृशमभिप्रायं सञ्चिन्त्य, लिच्छविना विमलकीर्तिनास्या एवंरुपर्द्विविध्या अभिसंस्कारोऽभिसंस्कृतः, (यथा) मेरुध्वजाल्लोकधातोर्भगवता मेरुप्रदीपराजेन तथागतेत द्वात्रिशत्सिंहासनसहस्राण्यनुप्रेषितानिएतावदुन्नतारोहाण्येतावद्विशालान्येतावद्दर्शनीयानि, यानि तैर्बोधिसत्त्वैश्च तैर्महाश्रावकैश्च तैःशक्रब्रह्मलोकपालदेवपुत्रैरदृष्टपूर्वाणि । तान्युपरिविहायस आगत्य, लिच्छवेर्विमलकीर्तेर्गृहे प्रतिष्ठानानि । द्वात्रिंशन्नानासिहासनसहस्रेष्वनायातेन वहमानेषु, तध्गृहमप्येतावद्विशालं दृष्यते स्म । वैशाल्यपि महानगर्यनिवृताभूत; जम्बुद्वीपश्चतुर्द्वीपको (लोकधातु)श्चानिवृताः, सर्वे तेऽपि यथापूर्व दृश्यन्ते स्म ।

अथ लिच्छविर्विमलकीर्तिर्मञ्जुश्रीकुमारभूतमेतदवोचत् "मंजुश्रीः, सिंहासनानुरुपकायाधिष्ठितास्तवमिमे च बोधिसत्त्वाः सिहासने (षु) निषीदत" । ततो येऽभिऽज्ञालाभिबोधिसत्त्वाः, ते द्विचत्वारिंशद्योजनशतसहस्रकायाधिष्ठिताः सिहासने(षु) निषीदन्ति स्म । ये बोधिसत्त्वाआदिकर्मिकाः, ते तेषु सिहासनेषु नीषीदितुन्नाशकन् । ततो लिच्छविर्विमलकीर्तिर्यथा ते बोधिसत्त्वाः पञ्चाभिज्ञायां सिध्येयुस्तथा ह्येवं तेभ्यो बोधिसत्त्वेभ्यो धर्म देशयि । तेऽभिज्ञां प्राप्य, (ऋद्ध्या) द्विचत्वारिशद्योजनशतसहस्रशरीराण्यभिनिर्माय, तेषु सिहासनेषु निषिदन्ति स्म । तेष्वापि महाश्रावकेषु तेषु सिहासनेषु निषीदितुमसमर्थेषु, लिच्छविर्विमलकीर्तिस्तत आयुष्मन्तं शारिपुत्रमब्रवीत् "भदन्त शारिपुत्र, सिहसने निषीद" । अवोचत् "सत्पुरुष, एषु सिहासनेषूत्कृष्टेषु चातिमात्रेषु, निषीदितुन्न शक्नोमि" । अब्रवीत् "भदन्त शारिपुत्र, तस्मै भगवते तथागताय मेरुप्रदीपराजाय कुरु प्रणामञ्च निषीदितुं शक्ष्यसि" । अथ ते महाश्रावकास्तस्मै भगवते तथागताय मेरुप्रदीपराजायाभिवन्दनं कृत्वा पुरतस्ते सिहासने(षु) न्यषीदन् ।

अथायुष्मांशारिपुत्रो लिच्छवि विमलकीर्तिमेतदवोचत् "कुलपुत्र, आश्चर्य (यथै)वमुत्कृष्टातिमात्राणीदृशनानासहस्राणि सिंहासनान्येतावदल्पगृहं प्रविशन्ति चैभिरपि वैशाली महानगरी निवृता नाति, जम्बूद्वीपस्य ग्रामनगरनिगमराष्ट्रराजधानी च चतुर्महाद्वीपकोऽपि (लोकधातु)श्च न किचिन्निवृताः, अपि च देवनागयक्षगन्धर्वासुर्गरुड किन्नरमहोरगस्थानान्यनिवृतानि पूर्व यादृशान्यायत्यपि दृश्यन्ते तथा" ।

लिच्छविर्विमलकीर्तिरब्रबीत् "भदन्त शारिपुत्र, तथागतेभ्यश्च बोधिसत्त्वेभ्योऽचिन्त्यो नाम विमोक्षोऽस्ति । तस्मिनचिन्त्यविमोक्षे विहरन्बोधिसत्त्व एतावदुन्नतातिरेकविपुलं सुमेरुं पर्वतराजं सर्षपाभ्यन्तरं प्रक्षिपन्तस्मिन्सर्षपेऽवर्धमाने च सुमेरावव्यये, (तादृशां) क्रीयां देशयति । चातुर्महाराजकायिकदेवाश्च त्रयस्त्रिंशदेवा अपिऽकुत्र वयं प्रक्षिप्ताःऽ, न जानन्ति । अन्यैस्त्वृद्विविधिनेयिकसत्त्वैः स पर्वतराजस्सुमेरुः सर्षपाभ्यन्तरं प्रक्षिप्तं प्रज्ञायते च दृश्यते । स हि, भदन्त शारिपुत्र, बोधिसत्त्वानां अचिन्त्यविमोक्षविषयप्रवेषः ।

"भदन्त शारिपुत्र, भूयोऽप्यचिन्त्यविमोक्षविहारिबोधिसत्त्वस्य चतुर्महासमुद्रस्य स्कन्धानेकोरोमकूपं प्रवर्तयः, मत्स्यकूर्मशिशुमारमण्डूकान्यजलजप्राणिभ्य उपघातो नास्ति । नागक्षगन्धर्वासुराणामप्येवंऽवयं कुत्र विवेशयिता इति न भवति; तस्यां क्रियायां दृश्यमानायां, तेभ्यस्सत्त्वेभ्य उपघातश्च संक्षोभो नास्ति ।

"अयमप्य(चिन्त्यविमोक्षविहारिबोधिसत्त्वस् । त्रिसाहस्रमहासाहस्रलोकधातुं कुम्भकारस्य चक्रमिव दक्षिणहस्तेनादाय च प्रवर्तय्य, गङ्गानदीवालुकोपमलोकधा(तूनां दूरं क्षिपति); क्षिप्त(श्च) सत्त्वाऽवयं कुत्रोद्धृताः, कुत आगता न जानन्ति । पुनरेव गृहीताः (स्व) स्थानमेव प्रतिष्ठापिता आगमनगमनन्न जानन्ति, यद्यपि सा क्रिया संदृशयते । "भदन्त शारिपुत्र, भूयोऽप्यप्रमेयकालवैनेयिकसत्त्वा विद्यन्ते, विद्यन्ते च संक्षेप्य कालवैनेयिकाः ।

तत्राचिन्त्यविमोक्षविहारिबोधिसत्त्वोऽप्रमेयकालवैनेयेकसत्त्ववैनेयार्थाय सप्ताहं कल्पात्ययेन, संक्षेप्यकालवैनेयिकसत्त्वेभ्यः कल्पं सप्ताहात्ययेन दर्शयते । तत्राप्रमेयकालवैनेयिकसत्त्वाः सप्ताहे कल्पात्ययं जानन्ति । ये संक्षेप्यकालवैनेयिकसत्त्वाः, ते कल्पं सप्ताहेनातीतं जानन्ति ।

"तथा ह्यचिन्त्यविमोक्षविहारिबोधिसत्त्वः सर्वबुद्धक्षेत्रगुणव्यूहानेकबिद्धक्षेत्रे दर्शयते । चापि सर्वसत्त्वान्दक्षिणकरतल आधाय, चित्तजवनर्द्धिविध्या गच्छन्त्यसर्वबुद्धक्षेत्राण्यादर्शयति, कि चाप्येकबुद्धक्षेत्रादचलितः । दशदिक्षु भगवते बुद्धाय यावत्पूजनानि, सर्वाणि तान्येकरोमकूपे देशयति । दशदिक्षु यावच्चन्द्रश्चादित्यश्च तारकारूपाणि, सर्वाणि तान्यप्येकरोमकूपे दर्शयते ।

"दशदिक्षु वायुमण्डलानि यावदुत्तिष्ठन्ति, सर्वाणि तानि मुखेन पीत्वा, तस्य कायोऽविनष्टश्च तेषां बुद्धक्षेत्राणां तृणवनस्पतयोऽप्रपतिताः । दशदिक्षु सर्व तं बुद्धक्षेत्रदहन कल्पोद्दाहाग्निराशि स्वोदरं प्रक्षिप्य, यत्कर्म तेन करणीयं, तत्करोति । अधस्ताद्गङ्गानदीवालुकासम(अनि) बुद्धक्षेत्रा(ण्य) अतिक्रम्य, स (एकं) बिद्धक्षेत्रमूर्ध्वमुत्क्षिप्य चारुह्य, ऊर्ध्व गङ्गानदीवालुकासमा(नि) बुद्धक्षेत्रा(ण्य) अतिक्रम्य, उपरिष्टात्तद्यथापि नाम महास्थाम्ना पुरुषेण सूच्यग्रेण बदरपत्रमुच्छ्रितमेवमेवोत्क्षिप्तं (बिद्धक्षेत्रन्) निक्षिपति ।

"तथा ह्यचिन्त्यविमोक्षविहारिबोधिसत्त्वः सर्वसत्त्वरुपमधितिष्ठति । चक्रवर्तिराजस्य रूपमधितिष्ठति; एवमेवाधितिष्ठति लोकपालशक्रब्रह्मश्रावकप्रत्येकबुद्धबोधिसत्त्वसर्वसत्त्वबुद्धरूपं ।

"(स बोधिसत्त्वो) दशदिक्षु सत्त्वानां सर्वाग्रमध्यहीनशब्दप्रसिद्धः । याः काश्चन शब्दप्रज्ञप्तयः, ताः सर्वा बुद्धघोषरुतंच बुद्धधर्मसंघशब्दमधितिष्ठति, तस्मात्शब्दस्वरादनित्यतादुःखशून्यनैरात्म्यशब्दस्वरं निश्चारयति; दशदिक्षु भगवान्बुद्दो यावदाकारमुपदेशेन दर्शयति, तेभ्यः सर्वेभ्यः शब्दस्वरेभ्यो निश्चारयति ।

"भदन्त शारिपुत्र, अयं ह्यचिन्त्यविमोक्षविहारिबोधिसत्त्वविषयप्रवेशः किंचिन्मात्रं केवलं दर्शितः । भदन्त शारिपुत्र, (तत्त्वतः) कल्पाभ्यधिकं वा तदतिक्रान्तं वाचिन्त्यविमोक्षविहारिबोधिसत्त्वविषयप्रवेशोपदेशं दएशनीयं (अभविष्यत्) । अथ महाकाश्यपः स्थविर इमं बोधिसत्त्वाचिन्त्यविमोक्षोपदेशं श्रुत्वा, आश्चर्याद्भुतप्राप्तः शारिपुत्रं स्थविरमेतदवोचत्

"आयुष्मंशारिपुत्र, तद्यथापि नाम जात्यन्धपुरुषस्याभिमुखं सर्वरूपोपपन्नानां क्रियाणां दर्शितानामपि तेन जात्यन्धेनैकरुपमपि तु न दृश्यते; एवमेवायुष्मंशारिपुत्र, अस्याचिन्त्यविमोक्षमुखस्य देशनाकाले सर्वश्रावकप्रत्येकबुद्धेभ्यो जात्यन्धसमेभ्यश्चक्षुर्नास्ति चैकमात्राचिन्त्यद्वारमप्यनभिमुखीभूतं । इममचिन्त्यविमोक्षं श्रुत्वा, को विचक्षणोऽनुत्तरसम्यक्संबोधिचित्तन्न जनयेत्?

"(अस्माभिः) प्रणष्टेन्द्रियैर्दग्धपूतिकबीजसदृशैरस्मै महायानाय भाजनाभूतैरिदानीं कथं करणीयम्? (अस्माभिर्) इमं धर्मोपदेशं श्रुत्वा, आर्तस्वरं क्रन्दित्वा, सर्वश्रावकप्रत्येकबुद्धैस्त्रिसाहस्रमहासाहस्रलोकधातौ

शब्दमादातव्यं । सर्वबोधिसत्त्वैरिममचिन्त्यविमोक्षं श्रुत्वा, युवको राजपुत्रो यथा मुकुटं गृहणीयाच्च प्रामोद्येन मूर्ध्नि प्रतिग्रहीष्यति, चास्मिन्स्वाधिमुक्तिबलमुत्पादयितव्यं । यास्मिनचिन्त्यविमोक्षऽधिमुक्तिः, तस्यां सर्वमारा अपि कि कुर्युः?"

महाकाश्यपेन स्थविरेनास्मनुपदेशे देशिते, द्वात्रिंशद्देवपुत्रसहस्राण्यनुत्तरसम्यक्संबोधिचित्तमुत्पादयन्ति स्म ।
ततो लिच्छविर्विमलकीर्तिर्महाकाश्यपं स्थविरमेतदवोचत् "भदन्त महाकाश्यप, दशदिक्ष्वपरिमाणलोकधातुषु ये केचिन्मारा मारकारिणः, सर्वे तेऽचिन्त्यविमोक्षविहारिबोधिसत्त्वाश्चोपायकौशल्येन सत्त्वपरिपाचनार्थम्मारकारिणः । "भदन्त महाकाश्यप, दशदिक्ष्वपरिमाणलोकधातुषु बोधिसत्त्वे(भ्यो) ये हस्तपदश्रोत्रघ्राणलोहितस्नाय्वस्थिमज्जाचक्षुः
पूर्वकायशीर्षाङ्गप्रत्यंगराज्यराष्ट्रप्रदेशभार्यापुत्रदुहितृदासदास्यश्वहस्तिरथवाहनसुवर्णजातरूपमणिमुक्ताश ङ्खस्फ़टिकशिलाप्रवाडवैडूर्यानर्घणिरत्नाहारपानरसवस्त्रयाचकाः संबाधं कुर्वन्ति, सर्वे तेऽपि याचका यद्भूयसाचिन्त्यविमोक्षविहारिबोधिसत्त्वा उपायकौशल्येनेमां (बोधिसत्त्व)अध्याशयदृढतां देशयन्ति । तत्कस्य हेतोः? भदन्त महाकाश्यप, बोधिसत्त्वेषु कटुकतपसैवं देशयत्सु, अकृतावकाशे जनकायाय बोधिसत्त्वसंबाधकरणानुभावो नास्ति । अकृतावकाशे (जनकायेन) हननोत्थापनं अशक्यं । "भदन्त काश्यप, तद्यथापि मान खद्योतकेन सूर्यमण्डलाभासोऽनाक्रमणीयः; एवमेव भदन्त काश्यप, अकृतावकाशे (जनकायेन) बोधिसत्त्वाक्रमणोत्थापनमशक्यं । भदन्त महाकाश्यप, तद्यथापि नाम कुञ्जरमातङ्गाय नागराजाय गर्दभेत प्रहारदानमक्षमणीयम्; एवमेव भदन्त महाकाश्यप, बोधिसत्त्वाभावेन बोधिसत्त्वसम्बाधकरणशक्यं । (यद्य) अपि खो पन बोधिसत्त्वः खलु बोधिसत्त्वाय सम्बाधं कुर्यात्(तद्) बोधिसत्त्वसम्बाधकरणं बोधिसत्त्वः क्षमते । "भदन्त महाकाश्यप, अयं हयचिन्त्यविमोक्षविहारिबोधिसत्त्वानामुपायज्ञानबलप्रवेशः" ।

अचिन्त्यविमोक्षनिर्देशस्य परिवर्तः पंचमः ।

६ देवी

अथ मंजुश्रीकुमारभूतो लिच्छवि विमलकीर्तिं एवमवोचत् "सत्पुरुष, बोधिसत्त्वेन सर्वसत्त्वाः कथं द्रष्टव्याः?" अब्रवीत् "मंजुश्रीः, तद्यथापि नाम विज्ञः पुरुष उदकचन्द्रं प्रक्षेते, एवमेव बोधिसत्त्वेन सर्वसत्त्वा द्रष्टव्याः । मंजुश्रीः, तद्यथापि नाम मायाकारो मायाकारनिर्मितमनुष्यं प्रेक्षते, एवमेव बोधिसत्त्वेन सर्वसत्त्वा द्रष्टव्याः । मंजुश्रीः, तद्यथापि नामादर्शमण्डले मुखं दृश्यम्, एवमेव बोधिसत्त्वेन सर्वसत्त्वा द्रष्टव्याः । मंजुश्रीः, तद्यथापि नाम मृगतृष्णिकाजलं बोधिसत्त्वेन सर्वसत्त्वा द्रष्टव्याः । मंजुश्री, तद्यथापि नाम प्रतिश्रुत्काघोषनादिः ।।।।।
आकाशमेघराशिः ।।।।।फ़ेनपिण्डस्य
पूर्वान्तः ।।।।।) बुद्बुदोदयव्ययौ ।।।।।कदलीसारापेक्षेव ।।।।। ।।।।।विद्युच्च्युतिरिव ।।
।।। पंचमधातुसदृशाः ।।।।।सप्तमायतनसदृशाः ।।।।।आरुप्येषु रूपदर्शनसदृशा ।।।।।

दग्धबीजाद् । । । । ।ऽङ्कुरनिष्पत्तिरिव । । । । । मण्डूकस्य रोमाच्छादनं यथा । । । । । ंअरणार्थिकस्य क्रीडारतिरिव । । । । । स्रोतापन्नस्य सत्कायदृष्टिर्यथा । । । । । सकृदागामिनि तृतीयभव इव । । । । । अनागामिनि गर्भावक्रान्तिः । । । । । । । । । । अर्हति रागद्वेषमोहाः । । । । । क्षान्तिलाभिबोधिसत्त्वे मात्सर्यदौःशील्यव्यापादविहिसाचित्तं । । । । । तथागते वासना । । । । । जात्यन्धजनेन रूप दर्शनं । । । । निरोधसमापत्ति(लाभिन) आनापानः । । । । । अकाशे शकुनेः पदं । । । । । । । । । । । । पण्डकलांगुलरोहणः । । । । । वन्ध्यापुत्रप्राप्तिः । । । । । तथागतनिर्भितस्य क्लेशोत्पत्तिः । । । । । विबोधे स्वप्नदृष्टदर्शनं । । । । । असङ्कल्पे क्लेशः । । । । । अहेतुकत्वादग्न्योत्पादः परिनिर्वृतस्य प्रतिसन्धिरिव बोधिसत्त्वेन सर्वसत्त्वाः प्रत्यवेक्ष्याः । मंजुश्रीः, एवं परमार्थत एव नैरार्म्यप्रबोधेन सर्वसत्त्वाः प्रत्यवेक्ष्याः" ।

अब्रवीत् "कुलपुत्र, यदि बोधिसत्त्वेन सर्वसत्त्वा एवं प्रत्यवेक्ष्याः, कथमथ सर्वसत्त्वेषु महामैत्र्युपपत्स्यते?" आह "मंजुश्रीः, यदा बोधिसत्त्वस्तथा हि प्रत्यवेक्षतेऽएवं धर्म परिज्ञाय, एभ्यः सत्त्वेभ्यो दर्शयामिऽ ति ततः सर्वसत्त्वेषु सम्यक्शरणमैत्र्युपपद्यते

"अनुपादानकारणादुपशान्तमैत्री, क्लेशाभावेनातापमैत्री, त्र्यध्वसमताकारणाद्यद्यदुपमता मैत्री, पर्युत्थानाभाव कारणादविरोधमैत्री, आध्यात्मिकबाह्यासम्भेदकारणाददद्वयमैत्री, सुनिष्ठाकारणादक्षोभ्यमैत्री, अभेद्याभिप्रायवज्रकारणाद्दृढमैत्री, स्वभावविशुद्धिकारणाद्विशुद्धिमैत्री, आशयसमताकारणात्समतामैत्री, अरिहननकारणादर्हन्मैत्री, अनाच्छेद्यसत्त्वपरिपाचनकारणाद्बोधिसत्त्वमैत्री, भूयोऽपि तथताधिगमकारणातथागतमैत्री, सत्त्वापस्वापनसुप्रबोधनकारणाद्बुद्धमैत्री, स्वयमभिसंबोधिकारणात्स्वयंभूमैत्री, तुल्यरसकारणाद्बोधिमैत्री, अनुनयप्रतिघप्रहाणकारणादनारोपमैत्री, महायानपर्यवभासकरणतो महाकरुणामैत्री, शून्यतानैरात्म्यप्रत्यवेक्षणकारणादपरिखेदमैत्री, आचार्यमुष्ट्यभावकारणादधर्मदानमैत्री, दुःशीलसत्त्वापेक्षाकारणात्शीलमैत्री, स्वपररक्षाकारणात्क्षान्तिमैत्री, सर्वसत्त्वभारवहनकारणाद्वीर्यमैत्री, अनास्वादकारणाद्ध्यानमैत्री, कालेनासाधनकारणात्प्रज्ञामैत्री, समन्तद्वारदर्शनकारणादुपायमैत्री, अभिप्रायपरिशुद्धिकारणादकुहनमैत्री, पश्चात्तापकरणतो निश्चलमैत्री, अनङ्गणकारणादध्याशयमैत्री, अकृत्रिमकारणादमायाविमैत्री, बुद्धसुखप्रतिष्ठापनकारणात्सुखमैत्री । मंजुश्रीः, सा हि बोधिसत्त्वस्य मैत्री । "

अब्रवीत् "तस्य महाकरुणा किम्?" आह "यद्यत्कुशलमूलं स्यात्कुशलमूलं स्यात्, (तत्) सर्वसत्त्वेभ्य उत्सृजति" । अब्रवीत् "तस्य महामुदिता किम्?" । आह "यः (स) दानात्प्रीतिमनोभूतोऽविप्रतिसारः" । अब्रवीत् "तस्योपेक्षा किम्?" आह "यः (स) उभयार्थोत्पादः" ।
अब्रवीत् "संसारभयभीतेन कि प्रतिसर्तव्यम्?" आह "संसारभयभीतेन मंजुश्रीर्बोधिसत्त्वेन बुद्धमाहात्म्यं प्रतिसर्तव्यम्" ।

आह "बुद्धमहात्म्ये स्थातुकामेन कुत्र स्थातव्यम्?" आह "बुद्धमहात्म्ये स्थातुकामेन सर्वसत्त्वसमतायां स्थातव्यं ।" आह "सर्वसत्त्वसमतायां स्थातुकामेन कुत्र स्थातव्यम्" आह "सर्वसत्त्वसमतायां स्थातुकामेन सर्वसत्त्वप्रमोक्षाय स्थातव्यम्" ।

अब्रवीत् "सर्वसत्त्वप्रमोक्षाय कर्तुकामेन कथं करणीयम्?" आह "सर्वसत्त्वप्रमोक्षाय कर्तुकामेन क्लेशप्रमोक्षः करणीयः" । अब्रवीत् "क्लेशप्रहातुकामेन कथं प्रयोक्तव्यम्?" आह "क्लेशप्रहातुकामेन योनिशः प्रयोक्तव्यम्" । अब्रवीत् "कथं प्रयुज्यमानो योनिशः प्रयुज्यते?" आह "अनुत्पादानिरोधयोः प्रयोगो हि योनिशः प्रयोगोऽस्ति" । अब्रवीत् "अनुदयः किम्, किं अनिरोधः?" आह "अकुशलानुदयश्च कुशलानिरोधः" । अब्रवीत् "कुशलाकुशलमूलं किम्?" आह "सत्काय (दृष्टि) र्मूलम्" । अब्रवीत् "सत्काय (दृष्टि) मूलं किम्?" आह "सत्काय (दृष्टि) मूलं रागः" । अब्रवीत् "कि रागमूलम्?" आह "रागस्य मूलं ह्यभूतपरिकल्पः" ।

अब्रवीत् "अभूतपरिकल्पस्य किं मूलम्?" आह "अभूतपरिकल्पस्य हि) विपर्यस्ता संज्ञा मूलम्" । आह "विपर्यस्तायाः संज्ञायाः कि मूलम्??" (आह "विपर्यस्तायाःसंज्ञाया) अप्रतिष्ठानं मूलम्" । आह "अप्रतिष्ठायाः किं मूलम्?" आह "यन्मंजुश्रीरप्रतिष्ठानं, न तस्य किंचिन्मूलं । इति ह्यप्रतिष्ठानमूलप्रतिष्ठिताः सर्वधर्माः" ।

अथ तस्मिन्गृहे कस्यचित्स्थानस्य देवी, तेषां बोधिसत्त्वानां महासत्त्वानामिमां धर्मदेशनां श्रुत्वा, हृष्टोदग्रा चात्तमनाः, औदारिकमात्मभावमभिसंदृश्य, दिव्यपुष्पैस्तान्बोधिसत्त्वान्महासत्त्वांश्च महाश्रावकानभिकिरति स्म । यानि च बोधिसत्त्वानां कायेऽभ्यवकीर्णानि पुष्पानि, तानि भूमौ प्रपतन्ति स्म । यानि महाश्रावकानां काय आपन्नानि पुष्पानि, तानि तत्रैव प्रसक्तानि भूमौ न प्रपतन्ति स्म । ततस्ते महाश्रावका ऋद्धिविधिप्रातिहार्येण पुष्पान्याधुनन्ति स्म, अपि खो पन तानि न प्रपतन्ति स्म ।

अथ सा देवयायुष्मन्तं शारिपुत्रमेतदवोचत् "भदन्त शारिपुत्र, इमानि पुष्पान्याधूय किं करिष्यसि?" आह "देवि, इमानि पुष्पानि न युज्यन्ते; तस्मादिमानि पुष्पानि रिंचामि" । देव्यब्रवीत् "भदन्त शारिपुत्र, एवम्मा वादीः । तत्कस्य हेतोः? युज्यन्त इमानि पुष्पानि । तत्कस्य हेतोः? यतस्तानि पुष्पानि निर्विकल्पानि । निर्विकल्पेषु शारिपुत्रः स्थविर एव कल्पयति च विकल्पयति । भदन्त शारिपुत्र, यत्स्वाख्याते धर्मविनये प्रव्रजिताः कल्पयन्ति च विकल्पयन्ति, तधि न युज्यते । स्थवीरे कल्पयति च विकल्पयति, यन्निर्विकल्पं तधि युज्यते ।

"पश्य, भदन्त शारिपुत्रतथा हि कल्पविकल्पप्रहाणकारणाद्बोधिसत्त्वानां महासत्त्वानां काये पुष्पानि न सज्जन्ति । तद्यथापि नाम भयजातीयमनुष्येऽमनुष्यैरवतारो लभ्यते, एवमेव संसारभयभीतेषु रूपशब्द गन्धरसस्प्रष्टव्येभ्योऽवतारः प्रतिलभ्यः । ये सर्वसंस्कारक्लेशभयापगताः, तेभ्यो रूपशब्दगन्धरसस्प्रष्टव्यानि कि करिष्यन्ति? येषु वासनाप्रहीणा, तेषु पुष्प (अन्य) पि सज्जन्ति; येषां तु वासना प्रहीणा, तेषां काये पुष्प(अनि) न सज्जन्ति । तस्मात्सर्ववासनाविघातकानां काये पुष्पान्य सक्तानि" ।

तत आयुष्मांशारिपुत्रस्तां देवीमेतदवोचत् "देवि, त्वमिमं गेहं प्रविश्य कियच्चिरचरितम्?" देव्याह "स्थविरो विमोक्षं प्रविष्टो यावत्, (तच्)चिरम्" । अब्रवीत् "देवि, त्वमस्मिन्गेहे स्थित्वा, अचिरं दृष्टा" । आह "स्थविरो विमोक्षं प्रविष्टः कियच्चिरम्?"अथ स्थविरस्तूष्णीभूतोऽभूत् । आह "महाप्रज्ञावतामग्र्यः स्थविरः कस्मान्मौनी चेदानीं सहसा प्रश्नन्न परिहरसि?" अब्रवीत् "देवि, विमोक्षऽनभिलाप्यश्च स यथा वक्तव्यः, (तन्) न जानामि" । आह "यानि स्वविरेणाक्षराण्युक्तानि, सर्वाणि तानि विमोक्षलक्षणानि । तत्कस्य हेतोः? यो विमोक्षः, स ह्यनन्तरगतश्च न बहिर्धा नोभयश्चानुपलब्धः । एवमेव तान्यक्षराण्यनन्तरगतानि न च बहिर्धा नोभयानि चानुपलब्धानि । तस्मात्, भदन्त शारिपुत्र, अक्षरापकर्षणेन विमोक्षम्माप्रतिवेदयस्व । तत्कस्य हेतोः? यतः सर्वधर्मसम(ता)र्यविमोक्षः" । अब्रवीत् "देवि, रागद्वेषमोहापगतेषु विमोक्ष ननु नास्ति?" देव्याह "sरागद्वेषमोहापगतेषु विमोक्षऽ इति स ह्यभिमानिकेभ्य उपदेशः । येऽनभिमानिकाः, तेभ्यो हि रागद्वेषमोहस्वभावता विमोक्षः" ।

अथायुष्मांशारिपुत्रस्तां देविमेतदवोचत् "साधु, देवि; कि प्राप्य, कि साक्षात्कृत्य त्वमेवंप्रतिभानवती?" । आह "भदन्त शारिपुत्र, मया न किञ्चित्प्राप्तं वा साक्षात्कृतं वा । अतो मे प्रतिभान ईदृशः । येषामेवम्sअस्माभि प्राप्तञ्च साक्षात्कृतम्s इति, ते हि स्वाख्यातधर्मविनयेऽऽतिमानिका उच्यन्ते" । अब्रवीत् "देवि, त्वं कि श्रावकयानीया प्रत्येकबुद्धयानीया वा महायानीया वा?" आह "श्रावकयानं दर्शयती, अहं श्रावकयानिनी । द्वादश(अंग) प्रतीत्यसमुत्पादेअद्वारेणावतारणेनाहं प्रत्येकबुद्धयानिनी । अनुत्सृष्टायाम्महाकरुणायां अहम्महायानीया । "भदन्त शारिपुत्र, अपि तु खलु पुनर्यथा चम्पकवने प्रविष्टे, एरण्डगन्धो न घ्रायते, चम्पकवने प्रविष्टेऽपि खो पन चम्पकगन्धो घ्रायते; एवमेव, भदन्त शारिपुत्र, अस्मिन्बुद्धधर्मगुणगन्धोपेते गेहे विहारिणा श्रावकप्रत्येकबुद्धगन्धो न घ्रायते । "भदन्त शारिपुत्र, ये शक्रब्रह्मलोकपालदेवनागयक्षगन्धर्वासुअगरुडकिंनरमहोरगा अस्मिन्गेहे निविष्टाः, तेपयस्य सत्पुरुषस्य धर्म श्रुत्वा, बुद्धधर्मगुणगन्धेन बोधिचित्तमुत्पाद्य प्रक्रान्ताः । "भदन्त शारिपुत्र, अस्मिन्गेहे द्वादश वर्षाणि महामैत्रीमहाकरुणा समर्पितां चाचिन्त्यबुद्धधर्मसम्प्रपुक्तां (कथां) स्थापयित्वा, श्रावकप्रत्येकबुद्धसहगतां कथां पुरा नाश्रौषं । भदन्त शारिपुत्र, अस्मिन्गृहेऽष्टविधा आश्चर्यद्भुतप्राप्ता धर्माः सततसमितमाभासं गच्छन्ति । कतमेऽष्टौ?

"अस्मिन्गृहे सततसमितं सुवर्णवर्णप्रभा । अतो रात्रीदिवन्न प्रज्ञायते । अस्मिन्गृहे चन्द्रसूर्यौ न च दृश्येते । अयं प्रथम आश्चर्याद्भुतो धर्मः ।

"पुनरपरं, भदन्त शारिपुत्र, ये प्रविशन्ति इदं गृहं, तेषां समनन्तरप्रविष्टानां सर्वक्लेशा न बाधन्ते । अयं द्वितीय आश्चर्याद्भूतो धर्मः ।

"पुनरपरं, भदन्त शारिपुत्र, अस्मिन्गृहे सदा शक्रब्रह्मलोकपालाश्च सर्वबुद्धक्षेत्रागता बोधिसत्त्वा अविरहिताः । अयं तृतीय आश्चर्याद्भूतो धर्मः ।

"पुनरपरं, भदन्त शारिपुत्र, अस्मिन्गृहे सततसमितं धर्मावधोषणञ्च षट्पारमिताप्रतिसंयुक्ता कथा चावैवर्तिकधर्मचक्रकथाऽविरहिताः । अयं चतुर्थ आश्चर्याद्भुतो धर्मः ।

"पुनरपरं, भदन्त शारिपुत्र, अस्मिन्गृहे सदा दिव्यमानुष्यदुन्दुभिसङ्गीतवाद्यं क्रीयते; तेभ्यो दुन्दुभिभ्यो बुद्धधर्म(स्य) आप्रमेयबिधिघोषः सर्वकालेषूत्पद्यते । आयं पञ्चम आश्चर्याद्भूतो धर्मः ।

"पुनरपरं, भदन्त शारिपुत्र, अस्मिन्गृहे सर्वरत्नसम्पूर्णाश्चतुरक्षयमहानिधयो विद्यन्ते । तदनुभावेन सर्वैर्दरिद्रैश्च व्यसनिभिः प्रपन्नम्, (महानिधि) कुण्डमपि त्वक्षयं । अयं षष्ठ आश्चर्याद्भुतो धर्मः ।

"पुनरपरं, भदन्त शारिपुत्र, अस्मिन्गृहे तथागताः शाक्यमुनिश्चामिताभश्चाक्षोभ्यश्च रत्नश्रीश्च रत्नार्चिश्च रत्नचन्द्रश्च रत्नव्यूहश्च दुष्पहश्च सर्वार्थसिद्धश्च महारत्नश्च सिहप्रसिद्धिश सिहस्वरश्चादयो दशदिक्ष्वपरिमाणतथागता अस्य सत्पुरुषस्य सहचित्तमात्रेण समागच्छन्ति चागतास्तथागतगुह्यन्नाम धर्ममुखप्रवेशं निदर्श्य प्रतिगच्छन्ति । अयं सप्तम आश्चर्याद्भूतो धर्मः ।

"पुनरपरं, भदन्त शारिपुत्र, अस्मिन्गृहे सर्वदेववेश्मव्यूहाश्चसर्वबुद्धक्षेत्रगुणालङ्कारा आभासं गच्छन्ति । अयमष्टम आश्चर्याद्भूतो धर्मः । "भदन्त शारिपुत्र, अस्मिन्गृहे तेष्वष्टास्वाश्चर्याद्भुतेषु धर्मेष्वाभासं गच्छत्सु चेदृशाचिन्त्यधर्मे दृश्यमाने, कः श्रावकधर्ममिच्छेत्?" अब्रवीत् "देवि, यदि ते स्त्रीभावात्स्याद्विकारः, किमपराधः?" आह "यावद्द्वादश वर्षाणि स्त्रीभावम्मे मृग्यमाणा, (सो)ऽद्यापि (मया) नोपलभ्यते । भदन्त शारिपुत्र, तस्यै मायाकारेण निर्मितायै स्त्रियै एवंऽयदि ते स्त्रीभावात्स्याद्विकारः, किमपराध?ऽ इत्युक्ते, तत्कि कथयेत?" अब्रवीत् "तत्र किचित्संपरिनिष्पन्नन्नास्ति" । आह "भदन्त शारिपुत्र, एवमेव सर्वधर्मेष्वपरिनिष्पन्नेषु च मायानिर्माणस्वभावेषु, त्वंऽयदि स्त्रीभावात्स्याद्विकारः, किमपराध?ऽ इति (पृच्छन्)तत्कि मन्यसे?" अथ सा देव्येतादृशाधिष्ठानाधिष्ठिताभूत्, यथा शारिपुत्रः स्थविरो यादृश सा देवी तादृशा दृश्यते स्म; सा देव्यपि यादृशः शारिपुत्रः, स्थविरस्तादृशो दृश्यते स्म । ततः सा शारिपुत्रस्य रूपमापन्ना देवी तं देवीरूपापन्नं शारिपुत्रमेवम् "भदन्त शारिपुत्र, यदि स्त्रीभावात्स्याद्विकारः, किमपराध?" इति पृच्छति स्म । देवीरूपापन्नः शारिपुत्र एतदवोचत् "मम पुरुषरूपस्यान्तर्हितस्य, स्त्रीकायापन्नो यो विकारस्तन्न जानामि" । आह "यदि स्थविरः स्त्रीरूपात्प्रतिविकारस्य समर्थः स्यात्, सर्वाः स्त्रियः स्त्रीभावात्परिवर्तेरन् । यथा स्थविरः स्त्री(रूपे) दृश्यते, तथा सर्वाः स्त्रियोऽपि स्त्रीरूपेषु दृश्यमानाः स्त्र्यभावात्स्त्रीरूपेषु दृश्यन्ते । ततो भगवताऽसर्वे धर्माः स्त्रीपुरुषाभावा इति संघाय भाषीतम्" ।

अथ सा देवी तदधिष्ठानमुत्सृजति स्म, आयुष्मांश्च शारिपुत्रः पुनः स्वरूपोपसंहितोऽभूत् । अथ सा देवी शारिपुत्रमेतदवोचत् "भदन्त शारिपुत्र, क्व ते स्त्रीपुत्तली?" अब्रवीत् "(सा) मया न च कृता न चापि विकृता । आह "एवमेव सर्वधर्मा अप्यकृताश्चाविकृताः । यदकृतंचाविकृतंचतधि बुद्धवचम्" । अब्रवीत् "देवी, इतश्च्युत्वा कुत्रोपपत्स्यसे?" आह "यत्र तथागतनिर्माणान्युत्पद्यन्ते, तत्राहमप्युपपत्स्ये" । अब्रवीत् "तथागतनिर्माणेषु न भवतश्च्युत्पत्ती" । आह "सर्वे धर्माश्च तथैव च्युत्युपत्त्यपगताः" ।

अब्रवीत् "देवि, केव चिरेण त्वं बोधिमभिसंभोत्स्यसे?" आह "यदा, स्थविर, पृथग्जनधर्मसंपन्नो भविष्यसि, तदापि बोधिमभिसम्बुद्धामि" । अब्रवीत् "देवि, (यद्) अहं पृथग्जनधर्मसंपन्नो भवेयम्, तदस्थानम्" । आह "भदन्त शारिपुत्र, एवमेव(यद्) अहमपि बोधिमभिसंबुध्यामि, तदस्थानं । तत्कस्य हेतोः? बोधिरस्थाने प्रतिष्ठिता; अतोऽस्थाने न कश्चिदभिसंबुद्धति" ।

शारिपुत्रः स्थविरोऽवोचत् "तथागतेनाख्यातम्ऽगंगानदीवालुकासमास्तथागता अभिसंबुद्धाः, अभिसंबुध्यन्त्यभिसंभोत्स्यन्तऽ इति" । देव्याह "भदन्त शारिपुत्र,ऽअतीतानागतप्रत्युत्पन्ना बुद्धा इति तध्यक्षरगणनासंकेताधिवचनं । अतीतानागतप्रत्युत्पन्नेषु बुद्धेष्वभूतेषु, बोधिस्त्र्यध्वसमतिक्रान्ता । स्थविरः किं अर्हत्त्वलाभी?" अब्रवीत् "अप्राप्तिहेतोर्लाभी" । आह "एवमेवाभिसंबोध्यभावहेतोरभिसंबोधिः" । ततो लिच्छविर्विमलकीर्तिरायुष्मन्तं शारिपुत्रं स्थविरमेतदवोचत् "भदन्त शारिपुत्र, इयं देवी बुद्धानां द्विनवतिकोटिनयुतानि पर्युपास्य, अभिज्ञाज्ञानविक्रीडिता प्रणिधानसंभूता क्षान्तिलाभिनी, अवैवर्तिक संप्रस्थिता सत्त्वपरिपाचनार्थाय प्रणिधानवशेन यथेष्टं तथावस्थिता" ।

७ तथागतगोत्रम्

ततो मंजुश्रीकुमारभूतो लिच्छवि विमलकीर्तिमेतदवोचत् "कुलपुत्र, अथ कथं बोधिसत्त्वो बुद्धधर्मेषु गति गच्छति?" आहऽमंजुश्रीः; यदा बोधिसत्त्वोऽगति गच्छति तदा बोधिसत्त्वो बुद्धधर्मेषु गति गच्छति" । अब्रवीत् "बोधिसत्त्वस्य आगतिगमनं किम्?"

आह "यदा (बोधिसत्त्वः) पंचानन्तरीयाणां गतिगामी, व्यापादविहिंसाप्रद्वेषोऽपि न भविष्यन्ति । नरकगतिगामी (सः), परं तु सर्वक्लेशविरजाः । तिर्यग्गतिगामी तु (स) मौर्ख्यान्धकारापगतः । (सो)ऽसुरगतिगामि च मानमददर्पविगतः; यमलोकगतिगामी सर्वपुण्यज्ञानसंभारोपात्तवान्; अनिज्यारूप्यगतिगामी, परं तु तद्गतिन्न समवक्रमति । "(स) रागगतिगामि च सर्वकामसंभोगवीरतरागः; द्वेषगतिगामी सर्व सत्त्वाप्रतिहतः; मोहगतिगामी सर्वधर्मेषु प्रज्ञानिध्यप्तिचित्तसमर्पितः । "मात्सर्यगतिगामी कायजीवितनिरपेक्षः (स) आध्यात्मिकबाह्यानि वस्तू(न्य्) उत्सृजति । दुःशीलगतिगामी, परं त्वल्पावद्येऽपि भयदर्शी (स) सर्वधूतगुणसंलेखेषु सन्तिष्ठते; व्यापादखिलप्रतिघगतिगामी चात्यन्ताव्यापन्नो मैत्रीविहारी; कौसीद्यगतिगामि चाप्रतिप्रस्रब्धो वीर्यमारभमाणः सर्वकुशलमूलपर्येषणाभियुक्तो भवति । इन्द्रियव्यभिचारगतिगामि स्वभावसमापन्नोऽमोघध्यानः, दौष्प्रज्ञगतिगामी प्रज्ञापारमितागतिमुपसंक्रम्य, (स) सर्वलौकिकलोकोत्तरशास्त्रपण्डितः । "कुहनलपनाकारगतिगामी च सन्ध्याभाष्येषु कुशलः (स) उपायकौशल्यचर्यानिर्यातः; मानगति दर्शयन्(स) सर्व लोकसेतुवेदिका भवति, क्लेशगतिगामी, परं त्वत्यन्तसंक्लेशरहितः स्वभावपरिशुद्धः । "मारगतिगामी च सर्वबुद्धधर्मेष्वपरप्रणेयः; श्रावकगतिगामि (स) सत्त्वांस्त्वश्रुतधर्म श्रावयति, प्रत्येकबुद्धगतिगामी सर्वसत्त्वपरिपाचनार्थम्महाकरुणादुत्पन्नः, दरिद्रगतिगामी त्वक्षयपरिभोगरत्नपाणिः; उपहतेन्द्रियगतिगामि (स) त्वभिरूपो लक्षणसमलंकृतः,

हीनकुलीनगतिगामी पुण्यज्ञानसंचयेन तथागतवंशात्प्रजायते; दुर्बलदुर्वर्णमन्दगतिगामी दर्शनीयो नारायणप्रतिरूपककायलाभी । "सर्वसत्त्वेभ्य आतुरदुःखचर्या
देशयमानो मरणभयसमतिक्रान्तस्(स) सुमारित(भयः); परिभोगगतिगामी सर्वाण्वेषणरहितोऽनित्यतासंज्ञायां बहुप्रत्यवेक्षणः, बोधिसत्त्वोऽन्तःपुरानेकरसान्देशयमानः कि तु विवेकचारी कामकर्दमोत्तीर्णः । धात्वायतनगतिगामी(स) धारणीइप्रतिलब्धो नानाप्रतिभानविभूषितः; तीर्थिकगतिगामी तीर्थ्यः (स) न भवति, सर्वलोकगतिगामि सर्वग्त्यप्रतिनिर्वर्ती, निर्वाणगतिगामी संसारप्रबन्धं नोत्सृजति । मंजुश्रीः, इत्येवं बोधिसत्त्वोऽगति गच्छन्बुद्धधर्मेषु गति गच्छति" । अथ लिच्छविर्विमलकीर्तिर्मञ्जुश्रीकुमारभूतमेतदवोचत् "मञ्जुश्रीः, कि तथागतगोत्रम्?" अब्रवीत् "कुलपुत्र, सत्कायो हि गोत्रं तथागतानां । अविद्याभवतृष्णा हि गोत्रं । रागद्वेषमोहचतुर्विपर्यास पञ्चनीवरणषडायतनसप्तविज्ञानस्थित्याष्टमिथ्यात्वनवाघातवस्तु दशाकुशलकर्मपथा हि गोत्रं । कुलपुत्र, इदं तथागतगोत्रम्; संक्षेपात्, कुलपुत्र, द्वाषष्टिर्दृष्टिगतानि हि तथागतगोत्रम्" । आह "मञ्जुश्रीः, कस्मात्समन्वाहृत्यैद्भाषसे?" अब्रवीत् "कुलपुत्र, असंस्कृतदर्शनसमव्रक्रान्तिस्थानेनानुत्तरसम्यक्सम्बोधिचित्तोत्पादोऽशक्यः । क्लेशाकरसंस्कृतस्थानसत्यादर्शनेनानुत्तरसम्यक्सम्बोधिचित्तोत्पादः शक्य ।

"कुलपुत्र, तद्यथापि नाम जांगल प्रदेशे कुसुमानिउत्पलपद्मकुमुदपुण्डरीकसौगन्धीकानि नोत्पद्यन्ते; पंकपुलिन उत्पादितानि चेत्, कुसुमानिउत्पलपद्मकुमुदपुण्डरीकसौगन्धिकान्युत्पद्यन्ते । कुलपुत्र, एवमेवासंस्कृतनियतप्राप्तिसत्त्वेभ्यो बुद्धधर्मा नोत्पद्यन्ते । क्लेशपंकपुलिनोपपन्नसत्त्वेभ्यो बुद्धधर्मा उत्पद्यते ।

"तद्यथापि नामाकाशे बीजन्न विरोहति, भुवि परंतु वर्तमानं बिरोहति; एवमेवासंस्कृतनियतप्राप्तिसत्त्वेभ्यो बुद्धधर्मो नोत्पद्यते; सुमेरुसमां सत्कायदृष्टिमुत्पाद्य बोधिचित्तमुत्पद्यते ततश्च बुद्धधर्मा विरोहन्ति । "कुलपुत्र, अनेन पर्यायेण सर्वे क्लेशास्तथागतगोत्रं द्रष्टव्याः । कुलपुत्र, तद्यथापि नाम महासमुद्रेऽप्रविष्टे, अनर्ध्यरत्नमनुप्राप्तुमशक्यम्; एवमेव, क्लेशसागरेऽप्रविष्टे, सर्वज्ञतां तस्मादुत्पादयितुमशक्यम्" । अथ महाकाश्यपः स्थविरो मंजुश्रीकुमारभूताय साधूकारमदात् "साधु, साधु । मंजुश्रीः, इदं वचनं सुप्रभाषितम्, इअदं तत्त्वं । क्लेशास्तथागतगोत्रम्, अस्मद्विधेभ्यस्तु बोधिचित्तोत्पादश्च बुद्धधर्ममभिसम्बोद्धुं कथं शक्यम्? पञ्चानन्तरीयसंयोगेन हि बोधिचित्तोत्पादः शक्यश्च बुद्धधर्मा अप्यभिसम्बोधनीयाः । तद्यथापि नाम विकलेन्द्रियपुरुषाय पञ्च कामगुणा निर्गुणाश्चासमर्थाः एवमेव परिवर्जितसर्वसंयोजनाय श्रावकाय सर्वे बुद्धधर्मा निर्गुणश्चासमर्था ः; तस्मै प्रत्यालम्बनमसमर्थ ।

"मंजुश्रीः, अतः पृथग्जनास्तथागते कृतज्ञाः, कि तु श्रावका अकृतज्ञाः । तत्कस्य हेतोः? यदर्थं पृथग्जनो बुद्धगुणश्रवणेन त्रिरत्नगोत्रमनुच्छिन्नकरणार्थमनुत्तरसम्यक्सम्बोधिचित्तोत्पादं करोति; श्रावकस्तु यावज्जीवं बुद्धधर्मबलवैशारद्यानि श्रुत्वाप्यनुत्तरसम्यक्सम्बोधिचित्तोत्पादेऽसमर्थः" । ततस्सर्वरूपसन्दर्शनो नाम बोधिसत्त्वस्तस्यां पर्षदि सन्निपतितो निषण्णो (ऽभूत्) । स लिच्छवि विमलकीर्तिमेतदवोचत् "गृहपते, क्व ते मातापितरौ च पुत्रदाराश्च दासदासीकर्मकरपौरुषेयाः? क्व ते

मित्रज्ञातिसालोहिताः? तव परिवाराश्वहस्तिरथपत्तिवाहनानि क्व?" एवमब्रवीत् । लिच्छविर्विमलकीर्तिः सर्वरूपसन्दर्शनं बोधिसत्वमिमा गाथा अभाषत

"विशुद्धबोधिसत्त्वानां माता हि प्रज्ञापारमिता ।
पितास्त्युपायकौशल्यं ताभ्यां जायन्ते परिणायकाः ।।
धर्मप्रीतिरस्ति पत्नी मैत्रीकरुणे दुहितरौ (तेषां) ।
उभे धर्मसत्ये स्तः पुत्रौ शून्यतार्थचित्तिर्गृहं ।।
एवं हि सर्वे क्लेशास्(तेषां) यथेष्टवशवर्तिशिष्याः ।
मित्राणि बोध्यंगानि तैर्हि बोधिर्वराग्रोत्पद्यते ।।
सहायास् तेषां सदासंवासाः सन्ति षट्पारमिताः ।
संग्रहा नारीभवनानि संगीतिस्(तेषां) धर्मदेशना ।।
तेषामुद्यानं भूतिकानि बोध्यङ्गपुष्पितं ।
विमुक्तिज्ञानं फ़लं धर्ममहाधनं (सन्ति) वृक्षाः ।।
विमोक्षा भवन्ति पुष्करिणी (तेषां) पूरिता समाधिजलेन ।
विशुद्धपद्मेनाच्छादिता (येषां) तस्यां प्रक्षालनं विमलास्ते ।।
अभिज्ञास् तेषा वाहनं महायानमनुत्तरं ।
सारथि (र्भवति) बोधिचित्तं मार्गो हयष्टाङ्गिकशान्तिः ।।
तेषां बिभूषणं (सन्ति) लक्षणानि अशीतिरनुव्यञ्जनानि च ।
कुशलाशयो ह्रीरपत्रपा सन्ति वस्त्राणि तेषां ।।
सद्धर्मधनवन्तस्ते प्रयोगस(तेषां) धर्मदेशना ।
पवित्रा प्रतिपत्तिर्महालाभः परिणामं (तेषां) बोध्यर्थं ।।
शयनञ्च भवन्ति चत्वारि ध्यानानि शुद्धाजीवेन संस्तृतास्ते ।
ज्ञानं तत्प्रबोधः सदा श्रवणसमापन्ना(स्ते) ।।
तदाहारश्च भवत्यमृतं पानं विमुक्तिरसः ।
बिशुद्धाभिप्रायोऽस्ति स्नानं (तेषां) शीलं गन्धविलेपनं ।।
क्लेशशत्रूपघातेनाथ अजितवीरास्ते ।
चतुरोऽपि मारान्प्रधर्षितवन्तः ।
उच्छ्रितवन्तो बोधिमण्डलध्वजं ।।
सञ्चिन्त्यं दर्शयन्ति जातिं कि चापि (ते)ऽजन्मानुत्पादाः ।
सर्वक्षेत्रेषु चाभासन्ते सूर्यो यथा समुदितः ।।
विनायके (भ्यः) सर्वपूजनैः बुद्धानां कोट्यै पूजां कृत्वा ।
न कदाचिद्(एतद्भवति) ऽअस्मा(भि)र्बुद्धेभ्यः परिसेवितव्यम्ऽ ।।
कि चापि सत्त्वहिताय बुद्धक्षेत्रावचरा(स्ते) ।
(ज्ञात्वा)ऽऽकाशोपमानि क्षेत्राणि सत्त्वे (षव्) असत्त्वसंज्ञिनः ।।

सर्वसत्त्वान ये रूपा रुतघोषाश्च ईरिताः ।
एकक्षणेन दर्शन्ति बोधिसत्त्वा विशारदाः ।।
मारकर्माणि कि चापि जानन्ति मारानुबन्धिनः ।
उपायपारं गतास्(ते) तत्सर्वक्रिया दर्शयन्ति ।।
ते जीर्णव्याधिता भोन्ति मृतमात्मान दर्शयी ।
सत्त्वानां परिपाकाय मायाधर्म विक्रीडिताः ।।
कल्पोद्दाहं च दर्शेन्ति उद्दहित्वा वसुन्धरां ।
नित्यसंज्ञिन सत्त्वानां अनित्यमिति दर्शयी ।।
सत्त्वैः शतसहस्रेभिरेकराष्ट्रे निमन्त्रिताः ।
सर्वेषां गृह भुञ्जन्ति सर्वान्नामन्ति बोधये ।।
ये केचिन्मन्त्रविद्या वा शिल्पस्थाना बहूविधाः ।
सर्वत्र पारमिप्राप्ताः सर्वसत्त्वसुखावहाः ।।
यावन्तो लोकपाषण्डाः सर्वत्र प्रव्रजन्ति ते ।
नानादृष्टिगतं प्राप्तांस्ते सत्त्वान्परिपाचति ।।
चन्द्रा वा भोन्ति सूर्या वा शक्रब्रह्मप्रजेश्वराः ।
भवन्ति आपस्तेजश्च पृथिवी मारुतस्तथा ।।
रोग अन्तरकल्पेषु भैषज्यं भोन्ति उत्तमाः ।
येन ते सत्त्व मुच्यन्ते सुखी भोन्ति अनामयाः ।।
दुर्भिक्षान्तरकल्पेषु भवन्ती पानभोजनं ।
क्षुधा पिपासामपनीय धर्म देशेन्ति प्राणिनां ।।
शस्त्र अन्तरकल्पेषु मैत्रीध्यायी भवन्ति ते ।
अव्यापादे नियोजेन्ति सत्त्वकोटिशतान्बहून् ।।
महासंग्राममध्ये च समपक्षा भवन्ति ते ।
सन्धिसामग्री रोचेन्ति बोधिसत्त्वा महाबलाः ।।
ये चापि निरयाः केचिद्बुद्धक्षेत्रेष्वचिन्तिषु ।
संचिन्त्य तत्र गच्छन्ति सत्त्वानां हितकारणात् ।।
यावन्त्यो गतयः कश्चित्तिर्यग्योनौ प्रकाशिताः ।
सर्वत्र धर्म देशेन्ति तेन उच्यन्ति नायकाः ।।
कामभोगां (श्च) दर्शेन्ति ध्यानं च ध्यायिनां तथा ।
विध्वस्तमारं कुर्वन्ति अवतारं न देन्ति ते ।।
अग्निमध्ये यथा पद्ममभूतं तं विनिर्दिशेत् ।।
एवं कामांश्च ध्यानं च अभूतं ते विदर्शयी ।।
संचिन्त्य गणिकां भोन्ति पुंसामाकर्षणाय ते ।
रागाङ्कुरं च संलोभ्य बुद्धज्ञाने स्थापयन्ति ते ।।

ग्राभिकाश्च सदा भोन्ति सार्थवाहाः पुरोहिताः ।
अग्रामात्याथ चामात्यः सत्त्वामां हितकारणात् ।।
दरिद्राणां च सत्त्वानां निधाना भोन्ति अक्षयाः ।
तेषां दानाअनि दत्वा च बोधिचित्तं जनेन्ति ते ।।
मानस्तब्धेषु सत्त्वेषु महानग्ना भवन्ति ते ।।
सर्वमानसमुद्धतं बिधि प्रार्थेन्ति उत्तमां ।।
भयादितानां सत्त्वानां सन्तिष्ठन्तेऽग्रतः सदा ।
अभयं तेषु दत्वा च परिपाचेन्ति बोधये ।।
पञ्चभिज्ञाश्च ते भूत्वा ऋषयो ब्रह्मचारिणः ।
शीले सत्त्वान्नियोजेन्ति क्षान्तिसौरत्यसंयमे ।।
उपस्थानगुरन्सत्त्वान्पश्यन्तीह विशारदाः ।
चेटा भवन्ति दासा वा शिष्यत्वमुपयान्ति च ।।
येन येनैव चांगेन सत्त्वो धर्मरतो भवेत् ।
दर्शेन्ति हि क्रियाः सर्वा महोपायसुशिक्षिताः ।।
येषां अनन्ता शिक्षा हि अनन्तश्चापि गोचरः ।
अनन्तज्ञानसम्पन्ना अनन्तप्राणिमोचकाः ।।
न तेषां कल्पकोटीभिः कल्पकोटिशतैरपि ।
बुद्धैरपि वदद्भिस्तु गुणान्तः सुवचो भवेत् ।।
येऽप्रज्ञहीनसत्त्वाः स्थापयित्वा (तान्) ।
अस्मिन्धर्मे श्रुते कोविदः को न प्रणिदधात्युत्तमबोध्यै?" ।।

८ अद्वयधर्ममुखप्रवेशः

अथ लिच्छविर्विमलकीर्तिस्तान्बोधिसत्त्वानेतदवोचत् "सत्पुरुषाः, किमस्ति बोधिसत्त्वानामद्वयधर्ममुखप्रवेशः? अस्तु स्वभिधानम्" ।
धर्मविकुर्वणो नाम बोधिसत्त्वस्तत्र तस्मिन्संनिपात एतदवोचत् "कुलपुत्र, उत्पादभङ्गौ हि द्वयम्; यदनुत्पन्नमजातं तस्मिन्कश्चिद्भङ्गो नास्ति । अनुत्पत्तिकधर्मक्षान्ति प्राप्तिरस्यद्वयप्रवेशः" ।
बोधिसत्त्वः श्रीगुप्तोऽभाषत "sअहञ्च ममेऽ ति तधि द्वयं । आत्मसमारोपाभावे मम (भावो) नास्ति । यः समारोपाभावः, स ह्यद्वयप्रवेशः" ।
बोधिसत्त्वः श्रीकूटोऽब्रवीत् "संक्लिष्टञ्च व्यवदानन्नाम ते द्वयं । संक्लिष्टपरिज्ञाने व्यवदानमन्यना नास्ति । सर्वमन्यनासून्मूलनानुगतिमार्गः सोऽद्वयप्रवेशः" ।
बोधिसत्त्वो भद्रज्योतिराह "चलश्च मन्यना तौ हि द्वयं । योऽचलः, (तत्) मन्यनाकरणम्, अमनसिकारोऽनधिकारः । अधिकारविप्रयोगः सोऽद्वयप्रवेशः" ।

बोधिसत्त्वः सुबाहुरवोचत् "बोधिचित्तं च श्रावकचित्तन्नामते हि द्वयं । यन्मायाचित्तसमदर्शनं तन्न च बोधिचित्तन्न च श्रावकचित्तं । या चित्तस्य समलक्षणता, सा ह्यद्वयप्रवेशः" ।

बोधिसत्त्वोऽनिभिष आह "आदानञ्चानादानं, ते द्वयं । यदनुपादानं, तन्नोपलभ्यते । यन्नोपलभ्यते, तस्मिन्कल्पनापकर्षणाकरणं । सर्वधर्माकरणमनाचारः, स ह्यद्वयप्रवेशः" ।

बोधिसत्त्वः सुनेत्रोऽवोचत् "एकलक्षणत्वञ्चालक्षणत्वन्नाम, ते द्वयं । यत्कल्पनाकरणं सङ्कल्पाकरणम्, (तद्) एकलक्षणत्वालक्षणत्वाकरणं । यो लक्षणाविलक्षणे समलक्षणताप्रवेशः, सोऽद्वयप्रवेशः" ।

बोधिसत्त्वस्तिष्योऽब्रवीत् "कुशलाकुधलं इति, ते द्वयं । यत्कुशलाकुशलानुत्थापनम्, निमित्तानिमित्तयोरद्वयावबोधः, (तद्) अद्वयप्रवेशः" ।

बोधिसत्त्वः सिहोऽभाषत "सावद्यञ्चानवद्यमिति, ते द्वयं । यत्प्रभेदज्ञानबञ्जेणाबन्धनानिःसरणं, तदद्वयप्रवेशः" ।

बोधिसत्त्वः सिहमतिरवोचत् "इदं सास्रवम्, इदमनास्रवमितिते हि द्वयं । यत्समताधर्मप्राप्त्यास्रवानास्त्रवसंज्ञाकरणञ्चसंज्ञाभावः, (यः) समतायां न च समताप्राप्तिर्न च संज्ञाग्रन्थिः, य एवमवतारः, तदद्वयप्रवेशः" ।

बोधिसत्त्वः सुखाधिमुक्तोऽभाषत "इदं हि सुखं इदं सुखन्नास्तीतिते द्वयं । सुविशुद्धज्ञानतः सर्वसंख्याविगता चाकाशसमालिप्ता बुद्धिः, साद्वयप्रवेशः" ।

बोधिसत्त्वो नारायणोऽब्रवीत् "इदं हि लौकिकम्, इदं लोकोत्तरमिति ते द्वयं । या लोकस्य स्वभावशून्यता, तस्यां किञ्चिदप्युत्तरणन्नास्ति, अवतारो नास्ति, न चाधिगति र्न चानधिगतिः । यस्यानुत्तरणं अनवतारोऽनधिगतिश्चानधिगत्यभावः, तध्यद्वयप्रवेशः" ।

बोधिसत्त्वो विनयमतिराह "संसारश्च निर्वाणमितिते द्वयं । संसारस्वभावदर्शनेन संसारश्च परिनिर्वाणन्न स्तः । यदेवं ज्ञातं, तदद्वयप्रवेशः" ।

बोधिसत्त्वः प्रत्यक्षदर्शनोऽवोचत् "क्षयाक्षयौ नामतौ द्वयं । क्षयोहि सुक्षीणः । यः सुक्षीणस्तस्मिन्न (किञ्चित्) क्षपयितव्यम्; अतोऽक्षय उच्यते । योऽक्षयः स क्षणिकश्च, क्षणिके क्षयो नास्ति । तदेवनमुप्रविष्टं अद्वयधर्मद्वारावगाहो नाम" ।

बोधिसत्त्वः समन्तगुप्तोऽब्रबीत् "आत्मनैरात्म्यमितिते द्वयं । आत्मभावेऽनुपलभ्यमाने, किं नैरात्म्यं कुर्यात्? (तत्) तयोः स्वभावदर्शनेनाद्वयं अद्वयप्रवेशः" ।

बोधिसत्त्वो विद्युद्देवोऽभाषत "विद्याविद्येऽतिते द्वयं । अविद्यायाः स्वभाव इव, तथैव विद्यापि । याविद्या भवति, साव्याकृता, असंख्येया, संज्ञापथातिक्रान्ता । अस्यां योऽभिसमयः, सोऽद्वयप्रवेशः" ।

बोधिसत्त्वः प्रियदर्शन आह "रूपं खलु शून्यं । रुपन्नाशनेन न शून्यम्, अपि खो पन रूपस्वभावः शून्यः । एवमेव वेदनासंज्ञासंस्कारविज्ञानं (च) शून्यतेऽतिते द्वयं । विज्ञानं खलु शून्यता । विज्ञानन्नाशनेन न शून्यम्, अपि खो पन विज्ञानस्वभावः शून्यः । योऽस्मिन्पञ्चोपादानस्कन्धे (ष्व्) एवमेव जानाति, एवं ज्ञानेन विज्ञः, सोऽद्वये प्रविशति" ।

बोधिसत्त्वः प्रभाकेतुरवोचत् "चतुर्धातुनोऽन्यत्राकाशधातुरन्य इतिते द्वयं । चतुर्धातु पुनराकाशस्वभावं । पूर्वान्तोऽप्याकाशस्वभावः । अपरान्तश्चाकाशस्वभावः । एवमेव प्रत्युत्पन्नं । यत्तथा धात्ववतारज्ञानम्, तदद्वयप्रवेशः" ।

बोधिसत्त्वोऽग्रमतिरभाषत "चक्षुश्च रूपन्नामते द्वयं । ये चक्षुःपरिज्ञानेन रूपेऽलोभोऽद्वेषोऽमोहः तधि शान्तिर्नाम । एवमेव श्रोत्रशब्दो, घ्राणगन्धौ, जिह्वारसौ, कायस्प्रष्टव्ये, मनोधर्मौते द्वयं । ये च मनः परिज्ञानाद्धर्मे(ष्व्) अलोभोऽद्वेषोऽमूहःतधि शान्तिर्नाम । एवं शान्तिविहारोऽद्वयप्रवेशः" ।

बोधिसत्त्वोऽक्षयमतिराह "दानसर्वज्ञतापरिणामनेते द्वयं । दानस्वभावः सर्वज्ञता । सर्वज्ञतास्वभावः परिणामना । एवमेव शीलक्षान्तिवीर्यध्यानप्रज्ञासर्वज्ञतापरिणामनेते द्वयं । सर्वज्ञता हि (शीलक्षान्तिवीर्यध्यान) प्रज्ञास्वभावः; परिणामना च सर्वज्ञतास्वभावः । तस्मिनेकनयेऽवतारः, सोऽद्वयप्रवेशः" ।

बोधिसत्त्वो गम्भीरमतिरभाषत "शून्यताया अन्यत्रानिमित्ताप्रणिहितमप्यन्यमितिते द्वयं । यच्छून्यम, तस्मिन्न किञ्चिन्निमित्तं । अनिमित्तेऽप्रणिहितं । अप्रणिहिते चित्तमानोविज्ञानासञ्चारः । यत्सर्वविमोक्षमुखेषु द्रष्टव्यमेक विमोक्षमुखं, तदद्वयमुखप्रवेशः" ।

बोधिसत्त्वः शान्तेन्द्रियोऽब्रवीत् "बुद्धधर्मसङ्घा इतिते द्वयं । बुद्धस्य स्वभावो हि धर्मः, धर्मस्य च स्वभावः सङ्घ । सर्वे ते पुनरसंस्कृताः । असंस्कृतं ह्याकाश (समम्) सर्वधर्मनय आकाशतुल्यः । यदेवमनुगमनं, तध्यद्वयप्रवेशः" ।

बोधिसत्त्वोऽप्रतिहतेक्षणोऽभाषत "सत्कायश्च सत्कायनिरोध इतितौ द्वयं । सत्काय एव निरोधः । तत्कस्य हेतोः? सत्कायदृष्ट्यनुत्पादेऽसति यत्तथा दृष्टयाऽसत्कायऽ इति वाऽसत्कायनिरोधऽ इति तद्कल्प्यम्; अकल्प्यं निर्विकल्पं । अत्यन्ताकल्पनया निरोधस्वभावो भवति । असम्भवोऽविनाशस्सोऽद्वयप्रवेशः" ।

बोधिसत्त्वः सुबिनीतोऽवोचत् "कायवाक्चित्तसंवरो नाम तदद्वयं । तत्कस्य हेतोः? इमे धर्मा अनभिसंस्कारलक्षणाः । तत्कायानभिसंस्कारं, तल्लक्षणेऽपि वागनबिसंस्कारञ्च चित्तानभिसंस्कारं । तत्सर्वधर्मानभिसंस्कारं, तदिति ज्ञातव्यमनुवेदितव्यं । तत्तदनभिसंस्कारज्ञानम्, तध्यद्वयप्रवेशः" ।

बोधिसत्त्वः पुण्यक्षेत्र आह "पुण्यापुण्यानिज्याभुसंस्काराभिसंस्कारणतेऽति ते द्वयं । यत्पुण्यापुण्यानिज़्यानभिसंस्कारम्, तदद्वयं । पुण्यापुण्यानिज्याभिसंस्काराणां स्वलक्षणं शून्यता । तस्या पुण्यं वापुण्यं वानिज्यं वा न भवन्ति । अभिसंस्करणतापि च न भवति य एवमनभिनिर्हारः, स ह्यद्वयप्रवेशः" ।

बोधिसत्त्वः पद्मव्यूहोऽब्रवीत् "आत्मपर्युत्थानादुत्पादः, तधि द्वयं । आत्मपरिज्ञा द्वयानुत्थापनं । तथाद्वयस्थानेऽविज्ञप्तिकेनाविज्ञाप्तिकम्तध्यद्वयप्रवेशः" ।

बोधिसत्त्वः श्रीगर्भोऽभाषत "उपलम्भेन प्रभेदःतद्द्वयं । योऽनुपलम्भस्तद्द्वयं । ततो यावनुपादाननोत्सर्गौ, तध्यद्वयप्रवेशः" ।

बोधिसत्त्वश्चन्द्रोत्तरोऽब्रवीत् "अन्धकारालोकावितितौ द्वयं । अन्धकारालोकाभावःतदद्वयं । तत्कस्य होतोः? एवं निरोधसमापन्ने न चान्धकारो न चालोकः । सर्वधर्मलक्षणत्वं तथैवापि । योऽस्यां समतायामवतारः, सोऽद्वयप्रवेशः" ।

बोधिसत्त्वो रत्नमुद्राहस्तोऽवोचत् "निर्वाणभिरतिश्च संसाररतिस्ते द्वयं । ये निर्वाणानभिरतिश्च संसारनरतिस्तेऽद्वयं । तत्कस्य हेतोः? यद्बन्धनान्निःसरणमाख्यायते, कि तु यदत्यन्ततोऽबन्धनम्, तन्मोक्षं कुतो गवेषी? (यद्) अबन्धनानिःसरणयोर्भिक्षुणा रत्यरती न लभ्येते, न तध्यद्वयप्रवेशः" ।

बोधिसत्त्वो रत्नकूटराज आह "मार्गकुमार्गावितितौ द्वयं । मार्गावगाहे कुमार्गानाचारः । अनाचारस्थानं मार्गसंज्ञा वाभूतमार्गसंज्ञा (वा) न भवति । संज्ञापरिज्ञा हि मतिद्वयानवतारः । सोऽद्वयप्रवेशः" ।
बोधिसत्त्वः सत्यरतोऽभाषत "सत्यमृषे नाम ते द्वयं । यदि सत्यदर्शनेन सत्यता(पि) न समनुदृश्यते,मिथ्यादृष्टिः कुतो दृश्यते? तत्कस्य हेतोः? मांसचक्षुषा न दृश्यते, दृश्यते प्रज्ञाचक्षुषा अदर्शनेन यथाविदर्शना, तथा (हि) दृश्यते । यत्र न च दर्शनन्न च विदर्शना तद्द्वयप्रवेशः" । तथैव ते बोधिसत्त्वाः स्वकस्वकनिर्देशं देशयित्वाः, मंजुश्रीकुमारभूतदमेतवोचन् "मंजुश्रीः, बोधिसत्त्वोस्याद्वयप्रवेशः किम्?"
मंजुश्रीरब्रवीत् "सत्पुरुषाः, यद्यपि सर्वैर्युष्माभिः सुभाषितम्, सर्व तद्युष्माभिरुक्तं हि द्वयं । स्थापयित्वैकोपदेशं (अपि), (यद्) अनभिलाप्यम्, अभाष्यम्, अनुक्तम्, अनवघोष्यम्, अव्यपदेश्यम्, प्रज्ञप्तिरहितं तध्यद्वयप्रवेशः" ।
ततो मंजुश्रीकुमारभूतो लिच्छवि विमलकीर्तिमेतदवोचत् "अस्माभिः स्वकस्वकनिर्देशे व्याख्याते, कुलपुत्र, त्वमप्यद्वयधर्ममुखनिर्देशाय स्वभिधानं कुरु" ।
अथ लिच्छविर्विमलकीर्तिस्तूष्णीभूतोऽभूत ।
ततो मंजुश्रीकुमारभूतो लिच्छविविमलकीर्तये साधुकारं अदात् "साधु, साधु, कुलपुत्र । अयं हि बोधिसत्त्वानां अद्वयप्रवेशः । तस्मिनक्षरवचनविज्ञप्तिप्रचारो नास्ति" ।
अस्मिन्निर्देशे देशिते, बोधिसत्त्वानां पञ्चसहस्रेणाद्वयधर्ममुखप्रवेशेनानुत्पत्तिकधर्मक्षान्तिः प्रतिलब्धा ।

अद्वयधर्ममुखप्रवेशस्य परिवर्तोऽस्तमः

९ निर्माणभोज्यादानम्
अथायुष्मतः शारिपुत्रस्यैतदभूत् "मध्याह्न आपन्ने, इमे महाबोधिसत्त्वाश्चेन्नोत्तिष्ठन्ति, इमेऽन्नं कुत्र भुञ्जन्त" इति ।
ततो लिच्छविर्विमलकीर्तिरायुष्मतः शारिपुत्रस्य चित्तवितर्क चेतसा ज्ञात्वा, आयुष्मन्तं शारिपुत्रमेतदवोचत् "भदन्त शारिपुत्र, तथागतेन येऽष्टौ विमोक्षा आख्याताः, तेषु विमोक्षेषु तिष्ठ, आमिषसम्मिश्रितविचारेण धर्मम्मा श्रौषीः । भदन्त शारिपुत्र, मुहूर्त प्रतीक्षस्व; अननुभूतपूर्वाहारं भक्षयिष्यसि" ।
ततस्तदा लिच्छविर्विमलकीर्तिस्तथारूपं समाधि समापद्यते स्म, ईदृशद्ध्यभिसंस्कारमभिसंस्करोति स्म, (यथा तद्) ऊर्ध्वदिशि बुद्धक्षेत्रम्, इतो द्विचत्वारिशद्गङ्गानदीवालुकासमानि बुद्धक्षेत्राण्य्) अतिक्रम्य, यत्सर्वगन्धसुगन्धा नाम लोकधातुः, तेभ्यो बोधिसत्त्वेभ्यश्च तेभ्यो महाश्राअवकेभ्यो दर्शयति स्म । तत्र सुगन्धकुटो नाम तथागतोऽद्य तिष्ठति, ध्रियते, यापयति । तस्मिल्लोकधातौ(यो) दशदिक्षु सर्वबुद्धक्षेत्राणां मनुष्यदेव्(एभ्यो) गन्ध उत्पद्यते, तस्माद्विशिष्टतरो (गन्धस्) तस्य लोकधातोर्दारुण उत्पद्यते । तस्मिल्लोकधातौ श्रावकप्रत्येकबुद्धानां नामधेयमपि नास्ति । केवलं बोधिसत्त्वानां गणसन्निपाताय स सुगन्धकूऊटस्तथागतो धर्म देशयति । तस्मिल्लोकधातौ सर्वाणि कूटागाराणि धूपमयानि; सर्वचंक्रमणोद्यानविमानानि च धूपमयानि । यत्तेषां बोधिसत्त्वानां जुष्टान्नं, तस्य गन्धेनाप्रमेयलोकधातवः स्फुटाः ।

तेन खलु समयेन भगवान्सुगन्धकूटस्तथागतस्तैर्बोधिसत्त्वैस्सहभोजनखादनार्थं निषण्णो (sभ्वत्) । तत्र महायानसम्प्रस्थितो गन्धव्यूहतर्पणो नाम देवपुत्रो भगवतश्च तेषां बोधिसत्त्वानां उपस्थाने च पर्युपासनेऽभियुक्तो (sभूत्) । ततस्तया सर्वावत्या पर्षदा तस्मिलोकधातौ स भगवांश्च ते बोधिसत्त्वा भोजनाय रचिता निषण्णा दृश्यन्ते स्म ।

अथ लिच्छविर्विमलकीर्तिः सर्वान्तान्बोधिसत्त्वानेतदवोचत् "सत्पुरुषाः, युष्मन्मध्ये कस्तस्माद्बुद्धक्षेत्रादाहारादानायोत्सहते?" अत्र मंजुश्रियोऽधिष्ठानेन न कश्चिदुत्सहते स्म । ततो लिच्छविर्विमलकीर्तिमंजुश्रीकुमारभूतमेतदवोचत् "मंजुश्रीः, ईदृशस्ते परिवारो ननु न लज्जा (करः)? आह "कुलपुत्र, तथागतेनऽनाशिक्षितायातिमन्यना कर्तव्येऽ ति ननु न प्रोक्तम्?"

अथ लिच्छविर्विमलकीर्तिस्तस्याः शय्याया अनुत्थाय, तेषां बोधिसत्त्वानां अभिमुखं निर्मितबोधिसत्त्वस्य सुवर्णवर्णप्रतिरूपकं लक्षणानुव्यञ्जस्वलङ्कृतं कायं निर्मिमीते स्म । येन स सर्वपरिवारो ध्यामीकृतः, तादृशो रूपे अवभासमागच्छति स्म ।

ततो लिच्छविर्विमलमीर्तिस्तं निर्मितबोधिसत्त्वमेतदवोचत् "कुलपुत्र, ऊर्ध्वदिशि गच्छ; द्वाचत्वारिशद्गङ्गनदीवालुकोपमानि बुद्धक्षेत्राण्यतिक्रभ्य, (तत्र्) अस्ति सर्वगन्धसुगन्धा नाम लोकधातुः । तत्र सुगन्धकूटो नाम तथागतोऽद्य भोजनखादनार्थं निषण्णः । तत्रोपसंक्रम्य, तस्य तथागतस्य पादौ शिरसाभिवन्द्य, एतन्निवेदयऽलिच्छविर्विमलकीर्तिर्भगवतः पादौ शतसहस्रकृत्वः शिरसाभिवन्द्य, भगवत्यल्पाबाधतां अल्पातङ्कतां लघूत्तथानतां यत्रां बलं सुखम्हनवद्यतां सुखस्पर्शविहारतां रोग्(आभावं) पृच्छति चैवमपोइ कथयति । भगवान्भोजनस्यावशेषं मे ददातु । तेन सहालोकधातौ (विमलकीर्ति) र्बुद्धकार्य करिष्यति । (ये) हीनाधिमुक्तिकसत्त्वाः, त उदाराधिमुक्ति जनयिष्यन्ति, तथागतलक्षणान्च वर्धन्तऽ इति" । अथ स निर्मितबोधिसत्त्वो लिच्छविविमलकीर्तयेऽसाध्व्ऽ इति कृत्वा, प्रत्यश्रौषीत् । उल्लोकितमुखस्तेषां बोधिसत्त्वानां अभिमुखादपक्रामाति स्म, ते बिधिसत्त्वास्तु तद्गमनन्न पश्यन्ति स्म । ततः स निर्मितबोधिसत्त्वो (येन) सर्वगन्धसुगन्धा नाम लोकधातुः; तेनोपगम्य, तस्य भगवतः सुगन्धकूटस्य तथागतस्य पादौ शिरसाभिवन्द्य, एतदवोचत्

"भगवन्, बोधिसत्त्वो विमलकीर्तिर्भगवतः पादौ शिरसाभिवन्द्य, भगवत्यल्पाबाधतां अल्पातङ्कतां लघूत्थानतां यात्रां बलं सुखं अनवद्यतां सुखस्पर्शविहारतां रोग्(आभावं) पृच्छति । स भगवतः पादौ सतसहस्रकृत्वः शिरसाभिवन्द्य, एतद्याचतिऽभगवान्भोजनस्य भोज्यावशेषम्मे ददातु । तेनास्मिन्सहालोकधातौ (विमलकीर्ति)र्बुद्धकार्य करिष्यति । (ये) हीनाधिमुक्तिकसत्त्वाः, ते बुद्धधर्मोदारमत्यधिमुक्ति जनयिष्यन्ति, तथागतलक्षणानि च वर्धन्तऽइति" ।

अथ ते भगवतः सुगन्धकूटस्य तथागतस्य बुद्धक्षेत्रस्य बोधिसत्त्वा आश्चर्याद्भुतप्राप्ताः तं भगवन्तं सुगन्धकूटं तथागतमेतदवोचन् "भगवनेवंरूपो महासत्त्वः कुत आगतः? स सहालोकधातुः क्वास्ति? "हीनाधिमुक्तिका" नाम तदस्ति किम्?" इति ते बोधिसत्त्वास्तं भगवन्तमेवं पृच्छन्ति स्म ।

ततो भगवांस्तान्बोधिसत्त्वानेतदवोचत् "कुलपुत्राः, इतोऽधोदिशि द्विवचत्वारिशद्गङ्गानदीवालुकासमानि बुद्धक्षेत्राण्यतिक्रम्य, अस्ति सहा नाम लोकधातुः । तत्र शाक्यमुनिर्नाम तथागतः पञ्चकषायबुद्धक्षेत्रे

हीनाधिमुक्तिकेभ्यः सत्त्वेभ्यो धर्मं देशयति । तत्र सोऽचिन्त्यविमोक्षविहारी विमलकीर्तिर्नाम बोधिसत्त्वः बोधिसत्त्वेभ्यो धर्मं देशयति । स मन्नामपरिकीर्तन्(आर्थाय) चास्य लोकधातोः प्रशंसासम्प्रकाशना (ऽर्थाय) च तेषां बोधिसत्त्वानां कुशलमूलसुतप्तकरणार्थाय निर्मितबोधिसत्त्वं प्रेषयति" ।

ततस्ते बोधिसत्त्वा एतदवोचन् "भगवन्, तस्य बोधिसत्त्वस्य माहात्म्यम्, यावदिदं निर्माणञ्च तस्यैवंरूपर्धिबलवैशारद्यानि भूतानि" । स भवानवोचत् "तस्य बोधिसत्त्वस्येदृशां माहात्म्यम्, (यथा) दशदिक्षु सर्वबुद्धक्षेत्रेषु निर्माणा (नि) प्रेषयति, तानि निर्माणानि च तेषां बुद्धक्षेत्राणां सर्वसत्त्वकार्य(आर्थ) बुद्धकार्येण प्रत्युपस्थितानि भवन्ति" ।

अथ भगवान्सुगन्धकूटस्तथागतः सर्वगन्धसमन्वागते भाजने सर्वगन्धवासितं भोजनं छोरयति स्म; तत्तस्मै निर्मितबोधिसत्त्वायादात् । ततस्तदा बोधिसत्त्वानां नवतिशतसहस्राणि तेन गमिकानि "भगवन्, वयमपि तां सहां लोकधातुं, तं भगवन्तं शाक्यमुनि दर्शनाय, वन्दनाय, पर्युपासनाय. तं च विमलकीर्तिं च तान्बोधिसत्त्वान्दर्शनाय गच्छामः" । स भगवानवोचत् "कुलपुत्राः, गच्छत यस्येदानीं कालं मन्यध्वे ।

"कुलपुत्राः, ते सत्त्वा उन्मादाश्च प्रमत्ताः खल्वभविष्यन्; तेन गच्छत गन्धापगतभूताः । तस्य सहालोकधातोस्ते सत्त्वा अवसादमासादयन्ति; तस्माहु स्वरूपान्निवर्तध्वं । तस्मिल्लोकधातौ हीनसंज्ञां उत्पाद्य, प्रतिघसंज्ञां मोत्पादयत । तत्कस्य हेतोः? कुलपुत्राः, बुद्धक्षेत्रैं ह्याकाशक्षेत्रं । सत्त्वपरिपाचनार्थाय भगवन्तो बुद्धाः सर्वान्बुद्धगोचरान्न दर्शन्ति" ।

अथ स निर्मित बोधिसत्त्वस्तत्(सर्वगन्धवासितं) भोज्यं समादाय, बोधिसत्त्वानां नवतिशतसहस्रैः सार्ध बुद्धानुभावेन च विमलकीर्तेरधिष्ठानेन ईकक्षणलवमुहूर्तेन तत्रईव तस्याः सर्वगन्धसुगन्धालोकधात्वा अन्तर्हितश्च लिच्छविविमलकीर्तेर्गृहे निषीदति स्म । अथ लिच्छविर्विमलकीर्तिर्यादृशानि पूर्वसिंहासनानि, तादृशानां नवतिशतसहस्राण्यधितिष्ठति स्म । तेषु ते बोधिसत्त्वा न्यषीदन् । ततस्स निर्मित बोधिसत्त्वस्तद्भोज्यपूर्णभाजनं विमलकीर्तयेऽदात् ।

ततस्तस्य भोज्यस्य गन्धो वैशालीं महानगरीं संन्यविक्षत्; साहस्रलोकधातुं यावच्च घ्रायते स्मास्वाद्यगन्धः । ये वैशाल्या ब्राह्मणगृहपतयश्च लिच्छव्यधिपो लिच्छविचन्द्रच्छत्रश्च तं गन्धमाघ्राय, आश्चर्यप्राप्ता अद्भुतप्राप्ताः प्रसन्नकायचित्ता लिच्छवीनां चतुरशीतिसहस्रैः परिपूर्णैः सह विमलकीर्तेर्गृहं प्रविशन्ति स्म ।

ते तस्मिन्गृहे बोधिसत्त्वान्सम्पूर्णसिहासनेषु तन्मात्रोन्नतातिमात्रविशालेषु निषण्णान्पश्यन्ति स्म । दृष्ट्वा, तैरधिमुक्तिश्च प्रमुदितोत्पादिताः । सर्वे ते तान्महाश्रावकां च तान्महाबोधिसत्त्वानभिवन्द्य, एकान्तेऽस्थुः । भूम्यवचरदेवपुत्राश्च कामावचररूपावचरदेवपुत्राश्च तेन गन्धेन चोदिता विमलकीर्तेर्गृहं समागच्छन्ति स्म ।

अथ लिच्छविर्विमलकीर्तिः शारिपुत्रं स्थविरं च तान्महाश्रावकानेतदवोचत् "भदन्ताः, तथागतभोज्यं महाकरुणापरिवासितामृतं भक्षयत, प्रादेशिकचित्ततां तु मोपप्रज्ञापयत । दानभोगेऽसमर्था अभविष्यत" । ततः केचिच्छ्रावका एतन्मन्यन्ते स्म "स्वल्पभोजनं इहानयैतादृशपरिषदा कथं भोजनीयम्?" इति । ततस्स निर्मितबोधिसत्त्वस्तां श्रावकानेतदवोचत् "आयुष्मन्तः, युष्मत्प्रज्ञापुण्ये तथागतस्य प्रज्ञापुण्याभ्यां मा तोलयत । तत्कस्य हेतोः? तद्यथापि नाम चतुर्महासमुद्राः क्षीणाः सम्भवेयुः, कि त्वस्मिन्भोजने न किञ्चित्क्षयोऽभविष्यत् । (एवमेव) सर्वे सत्त्वा तस्य भोजनस्य कल्पं सुमेरुमात्रालोपान्भक्षयेयुः, कि त्विदं क्षयन्नायास्यत् । तत्कस्य हेतोः? सोऽक्षयशीलप्रज्ञा समाधिमयस्य तथागतभोजनस्य भाजनावशेषः क्षयं यातुन्न शक्नोति" ।

अथ ततो भोजनात्सर्वावती सा पर्षत्तृप्ता भूता । न च तद्भोजनं क्षीयते । यैश्च बोधिसत्त्वैः श्रावकैश्च शक्रब्रह्मलोकपालैस्तदन्यैश्च सत्त्वैस्तद्भोजनं भुक्तम्, तेषां तादृशं सुखं कायेऽवक्रान्तं यादृशं सर्वसुखमण्डितायां लोकधातौ बोधिसत्त्वानां सुखं । सर्वरोमकूपेभ्यश्च तेषां तादृशो गन्धः प्रवाति, तद्यथापि नाम तस्यामेव सर्वगन्धसुगन्धायां लोकधातौ वृक्षाणां गन्धः ।

ततस्संप्रजानल्लिंच्छविर्विमलकीर्तिर्भगवतः सुगन्धकूटस्य तथागतस्य बुद्धक्षेत्रादागतान्बोधिसत्त्वानेतदवोचत् "कुलपुत्राः, तस्य तथागतस्य सुगन्धकूटस्य धर्मदेशना कीदृशा"? तेऽवदन् "स तथागतोऽक्षरनिरुक्तिभ्यां धर्मन्न दर्शयति । तेन गन्धेनैव बोधिसत्त्वा विनिता भवन्ति । ये गन्धवृक्षाः, येषां मूलेषु ते बोधिसत्त्वा निषण्णाः, तेभ्यो (यादृशो) गन्धस्तेभ्यो (बोधिसत्त्वेभ्यः), तादृशो निश्चरति । घ्रातमात्र एव तस्मिन्गन्धे, सर्वबोधिसत्त्वगुणाकरो नाम समाधि (स्तैः) प्रतिलभ्यते । प्राप्तमात्र एव तस्मिन्समाधौ, सर्वेषु तेषु बोधिसत्त्वगुणा उत्पद्यन्ते" ।

अथ ते बोधिसत्त्वा लिच्छवि विमलकीर्तिमेतदवदन् "इह भगवां शाक्यमुनिः कीदृशां धर्मदेशनां प्रकाशयति?" आह "सत्पुरुषाः, इमे सत्त्वा हि दुर्विनेयाः; एभ्यः खटुंकदुर्विनेयसत्त्वेभ्यः खटुंकदुर्विनेयविनेयकथाः प्रकाशयति । के खटुंकदुर्विनेयाः विनेयाः? खटुंकदुर्विनेयकथा कतमा? तद्यथा
"इमे हि नैरयिकाः, इयं हि तिर्यग्योनिः, अयं यमलोकः, इमानि ह्यक्षणानि, इमे विहीनेन्द्रियाः ।
"इदं हि कायदुश्चरितं, अयं हि कायदुश्चरितस्य विपाकः । इदं वाग्दुश्चरितं, अयं वाग्दुश्चरितस्य विपाकः । इदं मनोदुश्चरितं, अयं मनोदुश्चिरितस्य विपाकः । "अयं हि प्राणातिपातः, इयमदत्तादानं, अयं काममिथ्याचारः, अयं मृषावादः, अयं पैशुन्यवादः, अयं पारुष्यवादः, अयं संभिन्नप्रलापः, इयं ह्यभिध्या, अयं व्यापादः, इयं मिथ्यादृष्टिः, अयं हि तेषां विपाकः ।
"इदं मात्सर्य, इदं मात्सर्यस्य फ़लं; इदं दौःशील्यम्,(इदं दौःशील्यस्य फ़लं); अयं क्रोधः, (इदं क्रोधस्य फ़लम्); इदं कौसीद्यम्, इदं कौसीद्यस्य फ़लम्; इयं हि दौष्प्रज्ञा, इदं दौष्प्रज्ञाफ़लं ।
"अयं शिक्षापदसमतिक्रमः, अयं हि प्रातिमोक्षः; इदं कार्यम्, इदमकार्यम्; अयं योगाचारः; इदं प्रहाणम्; इदमावरणम्, इदमनावरणम्; इयमापत्तिः, इदमापत्तिव्युत्थानं; अयं मार्गः, अयं कुमार्गः; इदं कुशलम्, इदमकुशलम्; इदं सावद्यम्, इदमनवद्यम्; इदं सास्रवं इदमनास्रवम्; इदं लौकिकम्ऽ इदं लोकोत्तरम्; इदं संस्कृतम्, इदमसंस्कृतं अयं हि संक्लेशः, इदं व्यवदानम्; अयं संसारः, इदं निर्वाणं इति ।

"एवमनेकविद्यं धर्म देशयन्, (शाक्यमुनिस्तथागतः सत्त्वानाम्) अश्वखटुंकचित्तं प्रतिष्ठापयति । तद्यथापि नाम खटुंकाश्वो वा हस्ती वाऽर्वाक्मर्महता विनीता भवन्ति, एवमेव खटुंकदुर्विनेयाः सत्त्वा अपि सर्वदुःखप्रकाशनकथाया विनीता भवन्ति" ।

ते बोधिसत्त्वा अवदन् "तथा भगवतो बुद्धस्य शाक्यमुनेर्माहात्म्यं प्रतिष्ठापितं । आश्चर्य हि हीनदरिद्रखटुंकसत्त्वदमनं । ये (च) बोधिसत्त्वा एवंविध औदारिके बुद्धक्षेत्रेऽवस्थिताः, तेषामचिन्त्यमहाकरुणा" ।

ततो लिच्छविर्विमलकीर्तिरब्रवीत् "तत्तथेति, सत्पुरुषाः; यथा वदथ (तत्) तथा । ये बोधिसत्त्वा इहोत्पन्नाः, एषां महाकरुणा सुदृढा । तेऽतस्मिल्लोकधातावेकस्यां जात्यां सत्त्वेभ्यो बहवर्थ कुर्वन्ति । तस्यां सर्वगन्धसुगन्धायां लिकधातौ कल्पानामपि सतसहस्राणि सत्त्वेभ्य ईदृशमर्थ कर्तुन्न शक्नुवन्ति । तत्कस्य हेतोः? सत्पुरुषाः, अस्यां सहायां लोकधातौ दश परिग्रहावहाः कुशलसंनिचयधर्माः संविद्यन्ते । तेऽन्यस्मिन्बुद्धक्षेत्रे न भवन्ति । कतमे दश? तद्यथा
"दानेन दरिद्रसंग्रहः; शीलेन दुःशीलसंग्रहः; क्षान्त्या कटुकसंग्रहः; वीर्येण कुसीदसंहग्रहः; ध्यानेन विक्षिप्तचित्तसंग्रहः; प्रज्ञया दुष्प्रज्ञसंग्रहः; अक्षणप्राप्तेभ्योऽष्टाभ्योऽक्षणेभ्योऽतिक्रमणदेशना; प्रदेशकारिभ्यो महायानदेशना कुशलमूलेनानवरोपितकुशलमूलसंग्रहः; चतुर्भिः संग्रहवस्तुभिः सततसमितं सत्त्वपरिपाचनं । ते दश प्रग्रहावहाः कुशलसंनिचयधर्मा अन्यस्मिन्बुद्धक्षेत्रे न संविद्यन्ते" ।
बोधिसत्त्वा अवदन् "अन्विताः कतिभिर्धर्मैर्बोधिसत्त्वाः, अस्याः सहाया लोकधात्वाश्च्युत्वा, अक्षतानुपद्रुताः परिशुद्धबुद्धक्षेत्रं गमिष्यन्ति?" आह "अन्विता अष्टाभिर्धर्मैर्बोधिसत्त्वाः, अस्याः सहाया लोकधात्वाश्च्युत्वा, अक्षतानुपद्रुताः परिशुद्धबुद्धक्षेत्रं गमिष्यन्ति । कतमेऽष्टौ? (बोधिसत्त्वैः प्रत्यवेक्षितव्यम्) "ऽसर्वसत्त्वा मयानुग्रहयाः, इच्छंस्त्वेभ्यो न किचिद्हितं । सर्वसत्त्वानां सर्वदुःखं क्षाम्यम्, तत्(प्राप्तानि) सर्वकुशलमूलानि सर्वसत्त्वेभ्य उत्स्रष्टव्यानीति । सर्वसत्त्वेष्वप्रतिहतो (भवानि) । शास्तरीव सर्वबोधिसत्त्वनन्दी (भवानि) । श्रुताश्रुतधर्मा श्रुत्वा, (भवान्य्) अप्रतिक्षेपः । परलाभ ईर्ष्यापगतः स्वलाभेनागर्वश्च चित्तनिध्यप्तो (भवानि) । आत्मस्खलितानि प्रत्यवेक्षमाणः परदिषान्न चोदयामि । अप्रमादरतश्च सर्वगुणान्संप्रतीच्छमीऽ(ति) । तैरष्टाभिर्धर्मैरन्विता बोधिसत्त्वाः, सहाया लोकधात्वाश्च्युत्वा, अक्षतानुपद्रुताः परिसुद्धबुद्धक्षेत्रं गमिष्यन्ति" ।

अथ लिच्छविविमलकीर्तिना च मंजुश्रीकुमारभूतेन चैवं तस्यां पर्षदि संनिपतितेभ्यस्तथा हि धर्मे देशिते, शतमात्राणां प्रणिसहस्राणां अनुत्तरसम्यक्संबोधिचित्तान्युत्पादितानि । बोधिसत्त्वानां दशभिः सहस्रैरनुत्पत्तिकधर्मक्षान्तिः प्रतिलब्धा ।

निर्माणभोज्यादानस्य परिवर्तो नवमः ।

१० क्षयाक्षयन्नाम धर्मयौतकम्

तेन खलु पुनः समय आम्रपालीवने भगवता धर्मे निर्दिश्यमाने, स मण्डलमाडो विस्तीर्णो विशालोऽभूत्; सा पर्षच्च सुवर्णवर्ण इव संनिविष्टा(ऽभूत्) ।
ततः आयुष्मानानन्दो भगवन्तमेतदवोचत् "भगवन्, अत्रेदमाम्रपालीवनं विस्तीर्णंच विशालभूतं, सर्वावती पर्षदपि सुवर्णवर्णे दृश्यते । कस्य खल्विदं पूर्वनिमित्तं?" भगवानवोचत् "आनन्द, इदं लिच्छविविमलकीर्तिमंजुश्रीकुमारभूतयोः प्रभूतपरिवारेण परिवृतयोः पुरस्कृतयोस्तथागतसमीपागमनपूर्वनिमित्तं" ।
अथ लिच्छविर्विमलकीर्तिमंजुश्रीकुमारभूतमेतदवोचत् "मंजुश्रीः, इमे महासत्त्वा अपि नमस्यन्ति तथागतं दृश्यमानाः, तस्माद्दावां तथागतस्य समीपं गमिष्यावः" । मंजुश्रीराह "कुलपुत्र, गमिष्यावो यस्येदानीं कालं मन्यसे" ।

ततो लिच्छविर्विमलकीर्तिरेवंरूपं ऋद्ध्यभिसंस्कारमभिसंस्करोति स्म, यथा तैस्सिंहासनैस्साकं सर्वावतीं पर्षदं दक्षिणपाणौ प्रतिष्ठाप्य, येन भगवांस्तेनोपसंक्रान्तः । उपसंक्रम्य, पर्षदं भूमौ प्रतिष्ठापयति स्म । भगवतः पादौ शिरसाभिवन्द्य, सप्तकृत्वः प्रदक्षिणीकृत्यैकान्तेऽस्थात् ।
अथ तेऽपि सुगन्धकूटस्य तथागतस्य बुद्धक्षेत्रादागता बोधिसत्त्वाः सिंहासनेभ्योऽवतीर्य, भगवतः पादौ शिरसाभिवन्द्य, भगवते कृताञ्जलिभूता नमस्कुर्वन्त एकान्तेऽस्थुः । सर्वे तेऽपि बोधिसत्त्वा महासत्त्वाश्च महाश्रावकाश्च सिंहासनेभ्योऽवर्तीय, भगवतः पादौ शीरसाभिवन्द्य, एकान्तेऽस्थुः । एवमेव सर्वे ते शक्रब्रह्मलोकपालदेवपुत्रा भगवतः पादौ शिरसाभिवन्द्य, एकान्तेऽस्थुः ।

ततो भगवान्, तान्बोधिसत्त्वान्धर्मकथया संप्रहर्षयित्वा, एतदवोचत् "कुलपुत्राः, स्वकस्वकसिंहासनेषु निषीदत" । भगवतैतदुक्ते, ते न्यषीदन् ।
अथ भगवांशारिपुत्रमामन्त्रयते स्म "शारिपुत्र, बोधिसत्त्वानां वरसत्त्वानां विकुर्वणानि ननु त्वया दृष्टानि?" आहऽध्रुवं, भगवन्, दृष्टानि" । भगवानवोचत् "ततस्ते कीदृशा संज्ञोत्पन्ना?" आह "ध्रुवं, भगवन्ततो मेऽचिन्त्यसंज्ञोत्पन्ना । तेषां करणमेवमचिन्त्य दृष्टं, यथा चिन्तातुलनागणना अशक्याः" ।
अथ भगवन्तमायुष्मानानन्द एतदवोचत् "भगवन्, अपूर्वघ्रातो गन्धः श्रूयमाणः, ईदृशोऽस्ति कस्य गन्धः?" भगवानवोचत् "आनन्द, ते बोधिसत्त्वाः कायस्य सर्वरोमकूपेभ्य (इदृशं) गन्धं निःश्वसन्ति" । शारिपुत्रोऽप्याह "आयुष्मनानन्द, अस्मत्कायस्य सर्वरोमकूपेभ्योऽपीदृशो गन्धो निश्चरति" । आह "कुतो गन्ध आगतः?" आह "अयं लिच्छविर्विमलकीर्तिः सुगन्धकूटस्य तथागतस्य सर्वगन्धसुगन्धालोकधातोर्बुद्धत्राद्भोजनमादत्ते स्म । परिभुक्त्वा, सर्वेषां, कायादीदृशो गन्धो निश्चरति" ।
तत आयुष्मानानन्दो लिच्छवि विमलकीर्तिमेतदवोचत् "अयं गन्धः कियच्चिरमाविष्करणमायाति?" आह "यावदन्नमजीर्णं । आनन्द आह "कियच्चिरचरितं तदन्नं जीर्ण भविष्यति?" आह "सप्ताहरात्रान्तरे जीर्ण भविष्यति । ततोऽपि यावत्सप्ताहमेवभोजः परिस्फुटं भविष्यति । अजीर्णेऽपि (भोजने), न काचित्पीडा जायते ।

"यैश्च भदन्त आनन्द भिक्षुभिरनवक्रान्तनियामैरेतद्भोजनं भुक्तम्, तेषामेवावक्रान्तनियामानां परिणंस्यति । यैरवक्रान्तनियामैरेतद्भोजनं भुक्तं, यावत्तेऽपरिमुक्तचित्ताः" (तेषान्) न परिणंस्यति ।

यैरनुत्पादितबोधिर्चित्तैः सत्त्वै परिभुक्तं ।s तेषामुत्पादितबोधिचित्तानां परिणंस्यति । यैरुत्पादितबोधिचित्तैर्भुक्तम्s तेषां नाप्रतिलब्धक्षान्तिकानां परिणंस्यति । यैः प्रतिलब्धक्षान्तिकैर्भुक्तम्, तेषामेकजातिप्रतिबद्धानां परिणंस्यति ।

"भदन्तानन्द,तद्यथापि नामसरन्नाम भैषज्यमुदरेऽवतीर्य, यावत्सर्वाणि विषाण्यनपगतानि, (तावन्) न परिणंस्यति; तद्भैषज्यं पश्चात्परिणंस्यति । एवमेव, भदन्तानन्द, यावत्सर्वक्लेशविषाण्यनपगतानि, तद्भोजनन्न परिणंस्यति । तद्भोजनं पश्चात्केवलं परिणंस्यति ।
"तत आयुष्मानानन्दो भगवन्तमेतदवोचत् "इदम्, भगवन्, भोजनं हि बुद्धकार्यं करोति" । आमन्त्रयते स्म "तत्तथा, आनन्द; यथा वदसि, तत्तथेति ।

"संविद्यन्ते, आनन्द, बुद्धक्षेत्राणि, येषु बोधिसत्त्वा बुद्धकार्यं कुर्वन्ति; संविद्यन्ते बुद्धक्षेत्राणि, येषु प्रभया बुद्धकार्यं कृतं, ... येषु बोधिवृक्षेण..., ...तथागतलक्षणरूपदर्शनेन....,..... .....चीवरेण....., भोज्येन..... , ... जलेन....., ... उद्यानेन....., ... विमानेन....., ... कूटागारेण बुद्धकार्यं कृतं; संविद्यन्ते च आनन्द, बुद्धक्षेत्राणि, येषु निर्माणेन बुद्धकार्यं कृतं । आनन्द, संविद्यन्ते पुनर्बुद्धक्षेत्राणि, (येष्व्) आकाशेन बुद्धकार्यं कृतं । एवमेवाकाशान्तरीक्षं बुद्धकार्यं कृतं । अनेन ते सत्त्वा वैनेयिका भवन्ति" । "एवमेव, आनन्द, स्वप्नप्रतिबिम्बोदकचन्द्रप्रतिश्रुत्कामायामरीच्युदाहरणाक्षरनिरुक्तिदर्शनेन तेभ्यः सत्त्वेभ्यो बुद्धकार्यं कृतं । संविद्यन्तेऽपि बुद्धक्षेत्राणि, येष्वक्षरविज्ञप्त्या बुद्धकार्यं कृतं । आनन्द, यत्रावचनानभिलापानिदर्शनानुदाहारेण तेभ्यः सत्त्वेभ्यो बुद्धकार्यं कृतं, (तत्र) एवं परिशुद्धबुद्धक्षेत्राणि संविद्यन्ते ।

"भगवताम्, आनन्द बुद्धानां ईर्यापथोपभोगपरिभोगेन सत्त्वदमनार्थमकृतबुद्धकार्यं किञ्चिन्नास्ति । आनन्द, तैश्चतुर्भिर्मारैश्च चतुरशीतीशतसहस्रैश्च क्लेशमुखैः, (यैः) सत्त्वाः संक्लिष्टाः, सर्वैस्तैर्बुद्धा भगवन्तो बुद्धकार्यं कुर्वन्ति ।

"इदं ह्यानन्द, सर्वबुद्धधर्ममुखप्रवेशो नाम धर्ममुखं । तेऽस्मिन्धर्ममुखे प्रविष्टा बोधिसत्त्वाः सर्वोदारगुणव्यूहान्वितबुद्धक्षेत्रेषु न च दीना वोत्तमा वा । सर्वोदारगुणव्यूहान्वितबुद्धक्षेत्रेषु (ते), न चोदग्रा वा गर्विता वा, तथागतेषु प्रतिमानं उत्पादयन्ति । भगवन्तो बुद्धा (यथा) सर्वधर्मसमताधिगताः सत्त्वपरिपाचनार्थाय नानाप्रकारबुद्धक्षेत्राणि दर्शयन्ति, तदाश्चर्यं ।

"आनन्द, तद्यथापि नाम बुद्धक्षेत्राणां गुणा अन्योऽन्यं नानाविधाः, कि तु क्रियामार्गेण प्रसारितबुद्धक्षेत्राण्याकाशंचाभिन्नानि । एवमेव, आनन्द, तथागतानां रूपकाया नानाविधाः, परं तु तथागतानामसंगज्ञानं ह्याभिन्नं ।

"आनन्द, सर्वबुद्धानां रूपवर्णतेजः कायलक्षणाभिजातशीलसमाधिप्रज्ञाविमुक्तिज्ञानदर्शनबलवैशारद्या(sवेणिक) बुद्धधर्ममहामैत्रीमहाकरुणाहिताभिप्रायेर्यापथचर्यामार्गायुष्प्रमाणधर्मदेशनासत्त्वपरिपाचनसत्त्वविमोचन(बु

द्ध)क्षेत्रपरिशोधनानि सर्वबुद्धधर्मपरिनिष्पन्ने समानि । अतस्(तथागताः) सम्यक्संबुद्ध इत्युच्यन्ते, (उच्यन्ते) तथागता बुद्धा इति ।

"सुखमवगन्तुम्, आनन्द, तेषां त्रयाणां वाक्यानां यदर्थव्यासश्च वचनविभजनं, तन्न सुकरम्, यद्यप्यायुष्प्रमाणन्ते कल्पसंनिहितं (स्यात्) । (ये) त्रिसाहस्र (महासाहस्रलोकधात्व्)अन्तर्भूताः सत्त्वाः (स्युः), त्वमिवानन्दो बहुश्रुतानां स्मृतिधारणीप्राप्तानामग्रतां प्राप्ताः, सर्वे त आनन्दप्रतिरूपकसत्त्वाः कल्पमपि दर्श्यमानास्तेषां त्रयाणां वाक्यानांऽसम्यक्संबुद्धः, तथागतः, बुद्ध, इतिनियतार्थं अवगन्तुमसमर्थाः । तथा ह्यानन्द, बुद्धबोधिरप्रमाणा, अचिन्त्ये तथागतानां प्रज्ञा प्रतिभानञ्च" ।

अथ भगवन्तमायुष्मानानन्द एतत्वोचत् "भगवन्, अद्याग्रेणऽबहुश्रुतानां अग्र्योऽहम्ऽ इति न प्रतिजानामि" । भगवानवोचत् "दैन्यम्, आनन्द, मोत्पादय । तत्कस्य हेतोः? श्रावकेषु, न किन्तु बोधिसत्त्वेषु, त्वां समन्वाहृत्य,ऽबहुश्रुतानामग्र्यो (ऽसी)त्याख्यातं मया । आनन्द, बोधिसत्त्वेक्षणं तु निक्षिप; ते हि पण्डितैः प्रमाणग्राह्याः । सर्वसमुद्राणाम्, आनन्द, गम्भीरतां प्रमातुं शक्यम्, परं तु बोधिसत्त्वानां प्रज्ञाज्ञानस्मृतिधारणीप्रतिभानगम्भीरतां प्रमातुन्न शक्यं ।

"आनन्द, उपेक्षास्तु ते बोधिसत्त्वचर्यासु । तत्कस्य हेतोः? (यः), आनन्द, अनेन लिच्छविर्विमलकीर्तिनैकपूर्वाह्णे दर्शितो व्यूहः, सर्व ऋद्धिप्राप्तश्रावकाश्च प्रत्येकबुद्धाः कल्पानामपि शतसहस्रकोटीः सर्वर्द्धिनिर्माणप्रातिहार्यैः (तं) दर्शयितुन्न शक्नुवन्ति ।"

ततस्सर्वे ते तथागतस्य सुगन्धकूटस्य बुद्धक्षेत्रादागताः प्रगृहीताञ्जलिबोधिसत्त्वास्तथागतमभिवन्दित्वा, एतद्वचनमवोचन् "भगवन्, वयमत्रास्मिन्बुद्धक्षेत्र अवरोपितहीनसंज्ञामनसिकारान्प्रहातुमिच्छामः । तत्कस्य हेतोः? भगवतां बुद्धानाम्, भगवन्, बुद्धविषयोपायकौशल्यमचिन्त्यं । ते सर्वसत्त्वपरिपाचनार्थं यथा कामः, तथा तथा क्षेत्रव्यूहान्देशयन्ति । अस्मभ्यम्, अस्मत्सर्वगन्धसुगन्धालोकधातुं गत्वा, भगवान्भगवदनुस्मृत्यावहधर्मयौतकं ददातु" । एतदवोचन् ।
भगवानामन्त्र्यते स्म "कुलपुत्राः, अस्ति क्षयाक्षयन्नाम बोधिसत्त्वविमोक्षः । तस्मिन्युष्माभिः शिक्षितव्यं । स कतमः? क्षयो नाम हि संस्कृतम्, असंस्कृतं ह्यक्षयः । तस्मिन्बोधिसत्त्वेन संस्कृतन्न क्षपयितव्यम्, असंस्कृते न स्थातव्यं ।

"तस्मिन्संस्कृताक्षयो हि तद्यथा महामैत्र्यविनाशः, महाकरुणानुत्सर्जनम्, अध्याशयसंविवेशितस्य सर्वज्ञचित्तस्यासम्प्रमोषः, सत्त्वपरिपाचनेऽखेदः, संग्रहवस्तूनामनुत्सर्गः, सद्धर्मपरिग्रहार्थं कायजिवितोत्सर्गः, कुशलमूलेष्वसंतुष्टिः, परिणामनाकौशल्ये नियोजनम्, धर्मपर्येषणायामकौसीद्यम्, धर्मदेशनायामाचार्यमुष्टयकरणम्, तथागतदर्शनपूजार्थोद्योगः, संचिन्त्योपपत्त्यात्रासः, संपत्त्यां च विपत्त्यामनुन्नतिरनवनता, अशिक्षितेष्वनतिमन्यना च शिक्षितेषु शस्तरीव प्रियचिन्ता, स्फ़ीतक्लेशेषु योनिश उपसंहारः, विवेक आरमश्च तस्मिनश्लेषः, स्वसुख अनस्सक्तिश्चासक्तिः परसुखे, ध्यानसमाधिसमपत्तिष्ववीचिसंज्ञा, संसार उद्याननिर्वाणसंज्ञा, याचकेषु कल्याणमित्रसंज्ञा, सर्वस्वपरित्यागे सर्वज्ञतापूरणसंज्ञा, दुःशीलेषु गुप्तिसंज्ञा, पारमितासु मातृपितृसंज्ञा, बोधिपक्ष्यधर्मेषु स्वामिसेवासंज्ञा

सर्वकुशलमूलसंचयेनासन्तुष्टिश्च सर्वबुद्धक्षेत्र गुणैः स्वक्षेत्रनिष्पादना, लक्षणानुव्यञ्जनपरिपूरणार्थं अनर्गडयज्ञविसर्जनम्, सर्वपापाकरणेन कायवाक्चित्तालङ्कारः, कायवाक्चित्तपरिशुद्ध्यासंख्येयकल्पान्संसरणम्, चित्तपराक्रमेणाप्रमाणबुद्धगुणश्रवणेऽनवलीनता, क्लेशशत्रुनिग्रहाय तीक्ष्णप्रज्ञाशस्त्रधारणम्, सर्वसत्त्वभारहरणाय स्कन्धधात्वायतनाज्ञा, मारसेनां हन्तुं वीर्य्यज्वलनम्, निरधिमानतायै ज्ञानैषणा, धर्मोद्ग्रहणार्थं अल्पेच्छता च सन्तुष्टिः, सर्वलोकसन्तोषणाय सर्वलोकधर्मासंभेदः, लोकेन सह सामग्रीकरणार्थ सर्वेर्यापथाविनाशः, सर्वक्रियासम्प्रकाशनायाभिज्ञोपसंहारः, सर्वश्रुतधारणाय धारणीस्मृतिज्ञानानि, सर्वसत्त्वसंशयच्छेदनायेन्द्रियवरावरज्ञानम्, धर्मदेशनाया अप्रतिहताधिष्ठानम्, प्रतिभानप्राप्तिसुलाभेनाप्रतिहतप्रतिभानम्, कुशलकर्मपथपरिशुद्ध्या देवमनुष्यसम्पत्त्यास्वादनं चतुरप्रमाणप्रभावनया ब्रह्ममार्गप्रतिष्ठापनम्, धर्मदेशनाभ्यर्थनया चानुमोदनासाधुकारेण बुद्धस्वरप्रतिलम्भः, कायवाग्मनः संवरेण विशेषगामितया च सर्वधर्माश्लेषेण बुद्धेर्यापथप्रतिलम्भः, बोधिसत्त्वसंघसंग्रहेण महायानावतारणता, सर्वगुणाविप्रणाशेनाप्रमादः । कुलपुत्राः, (यो) बोधिसत्त्व एवं हि धर्माभियुक्तः, (स) बोधिसत्त्वः संस्कृतन्न क्षपयन्ति ।

"किं असंस्कृतेऽस्थानम्? यदा शून्यतायां व्यन्तीकरणम्, शून्यतासाक्षात्करणन्तु नास्ति; अनिमित्तव्यन्तीकरणम्, परं त्वनिमित्तसाक्षात्करणन्नास्ति; अप्रणिहितव्यन्तीकरणम्, कि त्वप्रणिहितसाक्षात्करणन्नास्ति; अनभिसंस्कारव्यन्तीकरणम्, अनभिसंस्कारसाक्षात्करणन्तु नास्ति ।

"अनित्यताप्रत्यवेक्षा, परं तु कुशलमूलासन्तुष्टिः; दुःखप्रत्यवेक्षा, किं तु संचिन्त्योपपत्तिः; नैरात्म्यप्रत्यवेक्षा, आत्मपरित्यागस्तु नास्ति ।

"शान्तिप्रत्यवेक्षा, परं तूपशमानुत्थापनम्; विवेकप्रत्यवेक्षा, कि तु कायचित्तेनौत्सुक्यम्; अनालयप्रत्यवेक्षा, अपि तु शुचिधर्मालयप्रतिक्षेपो नास्ति; अनुत्पादप्रत्यवेक्षा, सत्त्वानां तु भारादानधारणम्; अनास्रवप्रत्यवेक्षा, परं तु संसारप्रबन्धोत्थापनकरणम्; अप्रचारप्रत्यवेक्षा, सत्त्वपरिपाचनार्थ प्रचारोत्पादः; नैरात्म्यप्रत्यवेक्षा, अपि तु सत्त्वमहाकरुणानुत्सर्गः; अप्ररोहणप्रत्यवेक्षा, अपि तु खलु पुनः श्रावकनियत्यपातः ।

"(सर्वधर्मेषु) तुच्छरिक्तनिःसारास्वामिकानिकेतप्रत्यवेक्षा, परं त्वतुच्छपुण्ये चारिक्तज्ञाने च परिपुर्णसंकल्प्(एषु) च स्वयम्भूज्ञानाभिषेके च स्वयम्भूज्ञानाभियोगे च नीतार्थबुद्धगोत्रे प्रतिष्ठा ।

कुलपुत्राः, एवं हि तादृशधर्माधिमुक्तबोधिसत्त्वोऽसंस्कृते न तिष्ठति, संस्कृतञ्चापि न क्षपयति ।

पुनरपरं, कुलपुत्राः, बोधिसत्त्वः पुण्यसम्भारस्य समभिनिर्हारार्थं असंस्कृते न तिष्ठति, ज्ञानसम्भारसमभिनिर्हारार्थ संस्कृतन्न क्षपयति ।
महामैत्री समन्वागतः (सो)ऽसंस्कृते न तिष्ठति, महाकरुणासमन्वागतः (स) संस्कृतन्न क्षपयति ।

"सत्त्वपरिपाचनार्थाय (सो)ऽसंस्कृते न तिष्ठति, बुद्धधर्माधिमुक्तिकारणात्(स) संस्कृतन्न क्षपयति । बुद्धलक्षणपरिपूरणार्थं असंस्कृते न तिष्ठति, सर्वज्ञज्ञानपरिपूरणार्थं संस्कृतन्न क्षपयति ।

उपायकौशल्यकारणादसंस्कृते न तिष्ठति, प्रज्ञासुनिश्चितः (स) संस्कृतन्न क्षपयति । बुद्धक्षेत्रपरिशोधनार्थमसंस्कृते न तिष्ठति, बुद्धाधिष्ठानकारणात्संस्कृतन्न क्षपयति । सत्त्वार्थानुभवकारणादसंस्कृते न तिष्ठति, धर्मार्थ सम्प्रकाशनकारणात्संस्कृतन्न क्षपयति ।

"कुशलमूलसंचयार्थायासंस्कृते न तिष्ठति, कुशलमूलवासनाकारणात्संस्कृतन्न क्षपयति । प्रणिधानपरिपूरणार्थमसंस्कृते न तिष्ठति, अप्रणिहितकारणात्संस्कृतन्न क्षपयति । आशयपरिशुद्धिकारणादसंस्कृते न तिष्ठति, अध्याशयपरिशुद्धिकारणात्संस्कृतन्न क्षपयति । पञ्चभिज्ञाविक्रीडनताकारणादसंस्कृते न तिष्ठति, बुद्धज्ञानस्य षडभिज्ञार्थाय संस्कृतन्न क्षपययि ।

"पारमितासंचयपरिपूरणार्थं असंस्कृते न तिष्ठति, कालपरिपूरिकारणात्संस्कृतन्न क्षपयति । धर्मधनसंग्रहार्थमसंस्कृते न तिष्ठति, प्रादेशिकधर्मास्पृहणताकारणात्संस्कृतन्न क्षपयति । धर्मभैषज्यसंग्रहार्थमसंस्कृते न तिष्ठति, यथायोगं धर्मभैषज्यप्रयोगार्थाय संस्कृतन्न क्षपयति ।

"प्रतिज्ञाधैर्यार्थायासंस्कृते न तिष्ठति; प्रतिज्ञाहान्याः पश्चात्(यथा) अधिगच्छेत, (स) संस्कृतन्न क्षपयति । सर्व धर्मौषध्याधानार्थायासंस्कृते न तिष्ठति, एवं मृदुधर्मौषधप्रयोगार्थ संस्कृतन्न क्षपयति । स सर्वक्लेशरोगपरिज्ञानकारणादसंस्कृते न तिष्ठति, सर्वरोगसंशमनार्थ संस्कृतक्षयन्नेच्छति । कुलपुत्राः, इत्येवं बोधिसत्त्वः संस्कृतन्न क्षपयति चासंस्कृते न तिष्ठति । स हि बोधिसत्त्वानां क्षयाक्षयन्नाम विमोक्षः । तस्मिन्, सत्पुरुषाः, युष्माभिरपि योगः करणीयः" ।

अथ ते बोधिसत्त्वाः, इममुपदेशं श्रुत्वा तुष्टा उदग्रा आत्तमनसः प्रमुदिताः प्रीतिसौमनस्यजाताः, भगवत्पूजनार्थच तेभ्यो बोधिसत्त्वेभ्यश्चास्मै धर्मपर्यायाय पूजनार्थं ।, सर्वमिमं त्रिसाहस्रमहासाहस्रलोकधातुं सर्वानेकचूर्णगन्धधूपपुष्पैर्जानुमात्रं आच्छादयन्ति स्म । भगवतः पर्षन्मण्डलमभिकीर्य, भगवतः पादौ शिरसाभिवन्द्य, भगवते त्रिःप्रदक्षिणीकृत्य, उदानमुदानयामासुः । ततस्(ते)ऽस्मादबुद्धक्षेत्रादन्तर्हिता एकक्षणलवमुहूर्तेन तस्यां सर्वगन्धसुगन्धायां लोकधात्वान्न्यषीदन् ।

११ अभिरतिलोकधात्वादानं तथागताक्षोभ्यसन्दर्शनं च

अथ भगवांल्लिच्छवि विमलकीर्तिमेतदवोचत् "कुलपुत्र, यदा तथागतं द्रष्टुमिच्छसि, तदा कथं पश्यसि तथागतम्?" एवमामन्त्रयते स्म । लिच्छविर्विमलकीर्तिभगवन्तमेतदवोचत् "भगवन्, यदाहं तथागतं द्रष्टुकामः, तदाध्रुवं तथागतादर्शनेन (तं) पश्यामि । (तथागतं) पूर्वान्तादनुत्पन्नं चापरान्तमगच्छन्तंच प्रत्युत्पन्नेऽध्वन्यप्यप्रतिष्ठितं पश्यामि । तत्कस्य हेतोः?

"(तथागतो) रूपतथतास्वभावश्च रूपापगतः, वेदना..... संज्ञा ..... संस्कार.....विज्ञानतथता स्वभावश्च विज्ञानापगतः । चतुर्धात्वप्रतिष्ठितस्(तथागत) आकाशधातुसमः, षडायतनानुत्पन्नः, चक्षुः श्रोत्रघ्राणजिह्वाकायमनोमार्गसमतिक्रान्तः । (तथागतस्) त्रैधातुकासंकीर्णः, मलत्रयरहितः, विमोक्षत्रयानुगतः, त्रिविद्याप्राप्तः, अप्रतिलब्ध(श्च) सम्प्रतिलब्धः ।

"स) सर्वधर्मेष्वश्लेषनिष्ठागतः, भूतकोट्यपगतः, तथतासुप्रतिष्ठितः सोऽन्योन्यविगतः । (तथागतो) हेत्वनुत्पादितोऽप्रत्ययप्रतिबद्धः, लक्षणापगतः, असलक्षणः, न चैकलक्षणो न च भिन्नलक्षणः, अकल्पितः, असंकल्पितः, अविकल्पितः । (तथागतः) पारे नास्ति, अपारे च नास्ति, नास्ति मध्येऽपि; इह वा तेन वा तत्र वान्यत्र वा नास्ति । विज्ञानेन (सो)ऽज्ञातव्यः, विज्ञानस्थानन्नास्ति; (स) न च तमो न चालोकः ।

"(तथागतो) नामापगतो निमित्तापगतः, (स) नास्ति दुर्वलो वा बलवान्वा, न च देशस्थो न च पक्षस्थितः, कुशलाकुशलापगतः, संस्कृतासंस्कृतापगतः, कश्चिदभिलाप्योऽर्थो नास्ति; दानमात्सर्यशीलदौः शील्यक्षान्तिव्यापादवीर्यकौसीद्यध्यानौद्धत्यप्रज्ञादौष्प्रज्ञासु(सो)ऽनभिलाप्यः । (तथागतो) नास्ति सत्यं वा मृषा वावधारणं वाअनवधारणं वा, न च जगद्विधिर्न च जगदबिधिः, सर्ववादचर्यात्यन्तसमुच्छिन्नः । (स) क्षेत्रभावो वा क्षेत्राभावो वा नास्ति, न च दक्षिणीयो न च दानानुपभोगः, न ग्राहितव्यं वा स्पृशेयं वा निमित्तं वा । (सो)ऽसंकृतः, संख्याविगतः, समतासमः, धर्मतासमासमः, अतुल्यवीर्यः, तुलनासमतिक्रान्तः, गमनं वा, आपन्नं वा, समतिक्रान्तं वा (स) नास्ति । "(तथागतो)ऽदृष्टः, अश्रुतः, अमतः, अविज्ञातः, सर्वग्रन्थापगतः, सर्वज्ञज्ञानसमताप्राप्तः, सर्वधर्मसम(ता)निर्विशेषप्राप्तः, सर्वत्र निरवद्यः, अकिञ्चिनः, कषायरहितः, अकल्पः, अविकल्पः, अकृतः, अनुत्पन्नः, अजातः, अभूतः, असंभूतः; अभावी, अनभावी, अभयः, अनालयः; अशोकः अनानन्दः, अतरंगः, सर्वव्यवहारनिर्देशावक्तव्यः । "तथागतकायो हि, भगवन्, ईदृशः; स एवं द्रष्टव्यः । य एवं पश्यति, सम्यक्पश्यति सः । योऽन्यथा पश्यति, स मिथ्या पश्यति" । तत आयुष्मांशारिपुत्रो भगवन्तमेतदवोचत् "स कुलपुत्रो विमलकीर्तिः, भगवन्, कस्माद्बुद्धक्षेत्राच्च्युत्वा, अस्मिन्बुद्धक्षेत्र आगतः?" भगवानामन्त्रयते स्म "शारिपुत्र,
इमं सत्पुरुषंऽत्वं कस्माच्च्युत्वा, इह जात?ऽ इति पृच्छ" । तत आयुष्मांशारिपुत्रो लिच्छवि विमलकीर्तिमेतदवोचत् "कुलपुत्र, त्वं कस्माच्च्युत्वा, इह जातः?" विमलकीर्तिराह

"यः स्थविरेण साक्षात्कृतधर्मः, किं तस्मिश्च्युत्युत्पत्ती स्तःकेचित्?" आह "तस्मिन्धर्मे केचिच्च्युत्युत्पत्ती न स्तः" । आह "भदन्त शारिपुत्र, सर्वेषु धर्मेष्वेवमेव च्युत्युत्यपगतेषु, कस्मादेवंऽत्वं कस्माच्च्युत्वा, इह जात?ऽ इति मन्यसे? भदन्त शारिपुत्र, मायाकारनिर्मितौ चेत्स्त्रीं वा पुरुषं वाऽत्वं कस्माच्च्युत्वा, इह जात?ऽ इति पृच्छेत्, तत्समाधानं किं (अभविष्यत्)?" आह "निर्माणञ्चेच्च्युत्युत्पत्त्यपगतं, तत्किं व्यसर्जयिष्यत्?" आह "भदन्त शारिपुत्र, ननु नऽसर्वधर्मा निर्माणस्वभावा इति तथागतेनाख्यातम्?" आह "तत्तथेति, कुलपुत्र" । आह "सर्वेषु धर्मेषु, भदन्त शारिपुत्र, निर्माणस्वभावेषु, कस्मादिदंऽत्वं कस्माच्च्युत्वा, इह जात?ऽ इति मन्यसे? भदन्त शारिपुत्र, च्युतिर्नामाभिसंस्कारसंवर्त लक्षणा; उत्पत्तिर्नामसाभिसंस्कारसन्ततिलक्षणा । ततो बोधिसत्त्वो यद्यपि म्रियते, कुशलमूलाभिसंस्कारन्न क्षपयति । स यद्यपि जायते, अकुशलसन्ततिन्न प्रतिसन्दधाति" । अथ भगवानाअयुष्मन्तं शारिपुत्रमेतदवोचत् "शारिपुत्र, अयं सत्पुरुष इहागतोभिरतिलोकधातोरक्षोभ्यस्य तथागतस्यान्तिकात्" । आह "आश्चर्यम्, भगवन्, (यथा)ऽयं सत्पुरुषः, एतावद्विशुद्धबुद्धक्षेत्रादागतो (ऽस्मिन्) बहुलात्ययदुष्टे बुद्धक्षेत्रेऽभिनन्दति" । ततो लिच्छविर्विमलकीर्तिरब्रवीत् "शारिपुत्र, तत्कि मन्यसे? सूर्यप्रभासाः किमन्धकारसहिताः?" आह "नो हीदं, कुलपुत्र" । "ननु तौ न सहितौ?" आह "तौ, कुलपुत्र, असहितौ ।

सूर्यमण्डल अभ्युद्गतमात्रे, सर्वान्धकारा विगच्छन्ति" । आह "कस्माज्जम्बुद्वीपे सूर्य उदयति?" आह "तध्यालोककरणार्थंचान्धकारापकर्षणार्थम्" । आह "एवमेव, भदन्त शारिपुत्र, बोधिसत्त्वः सत्त्वपरिशोधनार्थं च ज्ञानालोककरणार्थ च महान्धकारापकर्षणार्थ संचिन्त्यापरिशुद्धक्षेत्रेषु
जायते । क्लेशैः सार्धन्न विरहति, सर्वसत्त्वानां तु क्लेशान्धकारं विनोदयति" । ततः सर्वासां तासां पर्षदांऽसाभिरतिलोकधातुश्च सोऽक्षोभ्यस्तथागतश्च ते बोधिसत्त्वाश्च ते महाश्रावका अस्माभिर्द्रष्टव्या इति भावनाभूत् ।

अथ भगवान्सर्वासां तासां पर्षदां चेतसैव चेतःपरिवितर्कमाज्ञाय, लिच्छवि विमलकीर्तिमेतदवोचत् "कुलपुत्र, इयं हि पर्षत्तामभिरतिलोकधातुं चाक्षोभ्यं तथागतं द्रष्टुमिच्छति; तेन तस्यै पर्षदे देशय" । अथ लिच्छवये विमलकीर्तय एवं भवति स्म "अस्मात्सिंहासनादनुत्थाय, तामभिरतिलोकधातुं च बोधिसत्त्वानां अनेकशतसहस्राणि च सचक्रवाड पर्वतपरिवृतभवनान्देवनागयक्षगन्धर्वासुरांश्च (तां लोकधातुं) सनदीतडागोत्ससरस्समुद्रपरिखां च ससुमेरुगिर्यल्पहर्म्या च सचन्द्रसूर्यतारकां च सदेवनागयक्षगन्धर्वस्थानां च सब्रह्मभवनपरिवारां च सग्रामनगरनिगमजनपदराष्ट्रनरनरीगृहां च सबोधिसत्त्वश्रावकपर्षदं चाक्षोभ्यस्य तथागतस्य बोधिवृक्षं चापि पर्षत्सागरे निषण्णं च धर्मं देशयन्तमक्षोभ्यं तथागतं च तानि पद्मानि, दशदिक्षु यानि सत्त्वेषु बुद्धकार्य कुर्वन्ति, (तत्सर्वं उपादास्यामि) । (यास्) तिस्रो रत्ननिःश्रेण्यो जम्बुद्वीपाद्यावत्त्रयास्त्रिंशभवनं, तास्वभ्यार्यनिःश्रेणीषु त्रयस्त्रिंशा देवा अक्षोभ्यस्य तथागतस्य दर्शनाय वन्दनाय पर्युपासनाय धर्मश्रवणाय च जम्बुद्वीपं उपयान्ति, (तासु च) जम्बुद्वीपस्य मनुष्यास्त्रयस्त्रिंशानां देवानां दर्शनाय त्रयस्त्रिंशभवनं आरोहन्ति, (ताश्च) तामेवंरुपां अप्रमाणगुणसञ्चयां अभिरतिलोकधातुं आप्स्कन्धाद्यावदकनिष्ठभवनं कुम्भकारस्य चक्रमिवोपादाय, केवलं छित्त्वा, दक्षिणपाणिना च पुष्पमालामिव गृहीत्वा, अस्यां च सहालोकधातौ प्रक्षेप्स्यामि । प्रक्षिप्य, अस्यै सर्वपर्षदे निर्देक्ष्यामि" । ततो लिच्छविर्विमलकीर्तिरेतादृशं समाधि समापद्यते
स्मैतादृशं चद्ध्यभिसंस्कारमभिसंस्करोति स्म, (यथा)भिरतिलोकधातुं, तां केवलं छित्त्वा, दक्षिणपाणिना गृहीत्वा, अस्यां सहालोकधातौ प्रक्षिपति स्म ।

तत्र ये श्रावकबोधिसत्त्वदेवमनुष्या दिव्यचक्षुरभिज्ञाप्राप्ताः, ते क्रन्दति स्म "भगवन्, उपादीयामहे । सुगत, उपादीयामहे । सुगत, अस्मभ्यं शरणं कुर्व"इति याचन्ते स्म । विनयार्थ भगवान्तानेतदवोचत् "बोधिसत्त्वेन विमलकीर्तिनोह्यध्वे; स हि मद्गोचरो नास्ति" । तत्रान्यदेवमनुष्यादिभिःकुत्रोह्यामहेह्ययज्ञातमदृष्टं । साभिरतिलोकधातुरस्यां सहालोकधातौ प्रक्षिप्यमाणापि, अस्यां लोकधातौ पूर्णत्वं वोनत्वं वा न ज्ञायेते स्म, न च संबाधो वा बन्धनं वा । साप्यभिरतिलोकधातुरनूनत्वा यथापूर्व, पश्चात्तथा दृश्यते स्म । अथ भगवांशाक्यमुनिस्ताः सर्वाः पर्षद आमन्त्रयते स्म "हे मित्राणि, पश्यताभिरतिलोकधातुं चाक्षोभ्यं तथागतं चेमान्बुद्धक्षेत्रश्रावकबोधि सत्त्वव्यूहान्" । तेऽवोचन् "ध्रुवम्, भगवन्, पश्यामः" । आह "(यो) बोधिसत्त्व एतादृशं बुद्धक्षेत्रं परिग्रहीतुकामः, (तेन) तथागतस्याक्षोभ्यस्य बोधिसत्त्वानां सर्वचर्या अनुशिक्षितव्याः" ।

तथा ह्यभिरतिलोकधातुसंदर्शनस्यार्द्धिप्रातिहार्येण चाक्षोभ्यतथागतसंसर्शनेनास्याः सहालोकधातोश्चतुर्दशदेवमनुष्यप्रजायुतैरनुत्तरसम्यक्सम्बोधिचित्तान्युत्पादितानि । सर्वेऽपि

तस्यामभिरतिलोकधातौ जनितुं प्रणिधानमकार्षुः, भगवांश्च सर्वेषां तेषामभिरतिलोकधातावुपपत्ति व्याकरोति स्म । लिच्छविर्विमलकीर्तिस्तथा हि सर्वास्तान्, यावत्परिपाचनीयानस्यां सहालोकधातौ, सत्त्वान्विपाच्य, तामभिरतिलोकधातुं यथास्थानं पुनः प्रतिष्ठापयति स्म । ततो भगवानायुष्मन्तं शारिपुत्रमेतदवोचत् "ननु पश्यसि, शारिपुत्र, तामभिरतिलोकधातुं चाक्षोभ्यं तथागतम्?" आह "ध्रुवम्, भगवन्पश्यामि । सर्वसत्त्वेभ्योऽस्तु तादृशो बुद्धक्षेत्रगुणव्यूहः । सर्वे सत्त्वाश्च भवन्तु कुलपुत्रो लिच्छविर्विमलकीर्तिर्यथा तादृशर्द्धिसम्पन्नाः । लाभा नः सुलब्धा यद्वयं तादृशं सत्पुरुषं पश्यामः । ये सत्त्वाः प्रत्युपन्नस्य वा परिनिर्वृततथागतस्य वेमं धर्मपर्यायं शृण्वन्त्यन्तशः, लाभास्तेषामपि सुलब्धा भवेयुः । कः पुनर्वादो य (इमं धर्मपर्यायं) श्रुत्वा, अधिमुच्यन्ते पत्तीयन्त्युद्ग्रहीष्यन्ति धारयिष्यन्ति वाचयिष्यन्ति पर्यवाप्स्यन्त्यधिमुच्य, देशयिष्यन्ति प्रपटन्ति परेभ्यश्च संप्रकाशयिष्यन्ति भावनाधिगमानुयुक्ता (भविष्यन्ति)? "ये सुलब्धा इमं धर्मपर्यायं, धर्मरत्ननिधि ते प्रतिलप्स्यन्ते । य इमं धर्मपर्यायं स्वाध्यायन्ति, ते भवन्ति तथागतस्य सहायाः । य एतद्धर्माधिमुक्तन्सत्कुर्वन्ति पर्युपासन्ति च, ते हि भूता धर्मपालाः । य इमं धर्मपर्यायं सम्यग्लिखन्ति धारयिष्यन्ति मानयिष्यन्ति, तेषां गृहे तथागतो विहरिष्यति । येऽस्मिन्धर्मर्यायेऽनुमोदन्ते, ते परिरक्षन्ति
सर्वपुण्यानि । ये केचिदितो धर्मपर्यायादन्तशश्चतुष्पादिकामपि गाथामुद्गृह्य, परेभ्यो देशयेयुः, ते हि महाधर्मयज्ञं कुर्युः । ये(षाम्) अस्मिन्धर्मपर्याये क्षान्तिश्च छन्दश्च बुद्धिश्चासावबोधनादर्शनाधिमुक्तयः, तेभ्यस्तदेव व्याकरणं ।

अभिरतिलोकधत्वादानस्य तथागताक्षोभ्यसंदर्शनस्य च परिवर्त एकादशः ।

१२ पूर्वयोगः सद्धर्मपरीन्दना च

अथ भगवन्तं शक्रो देवानामिन्द्र एतदवोचत् "पुरा, भगवन्, तथागतान्मंजुश्रीकुमारभूताच्च धर्मपर्यायानां बहुशतसहस्राण्यश्रौषम्, परं तु यथास्माद्धर्मपर्यायादीदृशाचिन्त्यविकुर्वणनयप्रवेशनिर्देशः पुरा न कदाचिदश्रौषं ।

"ये सत्त्वाः, भगवन्, इमं धर्मपर्यायमुद्ग्रहीष्यन्ति धारयिष्यन्ति वाचयिष्यन्ति पर्यवाप्स्यन्ति, तेऽपि निःसंशयमेतादृशधर्मभाजनं भवेयुः । कः पुनर्वादो ये भावनाधिगमनानुयुक्ता (भविष्यन्ति)? ते छेत्स्यन्ति सर्वदुर्गति(मार्गम्), तेभ्यः सर्वसुगतिमार्गो विवृतः; सर्वबुद्धैस्ते दृष्टा भविष्यन्ति; ते सर्वपरप्रवादिघ्ना भविष्यन्ति; सर्वमारास्तैः सुपराजिता भविष्यन्ति; ते विशोधितबोधिसत्त्वमार्गा भविष्यन्ति, बोधिमण्डसमाश्रितास्तथागतगोचरे समवसरन्ति ।
"कुलपुत्रो वा कुलदुहिता वा, भगवन्यौ धारयिष्यत इमं धर्मपर्यायं, ताभ्यां सर्वपरिवारेण सह सत्कारं पर्युपासनं करिष्यामि । (तेषु) ग्रामनगरनिगमजनपदराष्ट्रराजधानीषु, येष्वयं धर्मपर्यायश्चर्यते निर्दिश्यते प्रकाश्यते, तेन धर्मश्रवणाय सपरिवारो गमिष्यामि । अश्रद्धेषु कुलपुत्रेषु श्रद्धामुत्पादयिष्यामि, श्राद्धानां धार्मिकेन रक्षावरण गुप्ति करिष्यामि" ।

एवमुक्ते, भगवांशक्रं देवानामिन्द्रमेतदामन्त्रयते स्म "साधु, देवेन्द्र, साधु । (यत्) त्वया सुभाषितम्, तस्मिंस्तथागतोऽप्यनुमोदते । (या), देवेन्द्र, अतीतानागतप्रत्युत्पन्नानां भगवतां बुद्धानां बोधिः, सास्माद्धर्मपर्यायान्निर्दिष्टा । अतो देवेन्द्र, ये केचित्कुलपुत्रा वा कुलदुहितरो वेमं धर्मपर्यायमुद्ग्रहीष्यन्ति, अन्तशः पुस्तके लिखिष्यन्ति, उद्ग्रहीष्यन्ति वाचयिष्यन्ति पर्यवाप्स्यन्ति, ते ह्यतीतानागतप्रत्युत्पन्नान्भगवतो बुद्धान्पूजयिष्यन्ति ।

"अयं, देवेन्द्र, त्रिसाहस्रमहासाहस्रलोकधातुस्तथागतैः परिपूर्णः (स्यात्, परिपूर्णस्) तद्यथापि नामेक्षुवनैर्वा नडवनैर्वा वेणुवनैर्वा तिलवनैर्वा खदिरवनैर्वा; (यैरयं लोकधातुः) परिपूर्णस्तांस्तथागतान्, कल्पं वा कल्पाधिकं वा, कुलपुत्रू वा कुलदुहिता वा मानयेद्गुरुकुर्यात्सत्कुर्यात्पूजयेत्सर्वपूजासुखोपधानैः । तेषां परिनिर्वृतानामपि तथागतानामेकैकस्य तथागतस्य पूजनार्थं सर्वरत्नमयं विस्तरेण चतुर्महाद्वीपकलोकप्रमाणमारोहे ब्रह्मलोकसम्प्राप्तमुच्छ्रितच्छत्रपताकयष्टिसूपशोभितं एकान्तकठोराकुथितशारीरिकधास्तूपं (कुर्यात्) । स एवमेव सर्वतथागतानां प्रत्येकं स्तूपं कृत्वा, तत्कल्पं वा कल्पाधिकं वा सर्वपुष्पगन्धध्वजपताकैः पूजयेद्घट्टियदुन्दुभितूर्यैश्च ।

"तत्कि मन्यसे, देवेन्द्र, अपि नु स कुलपुत्रो वा कुलदुहिता वा ततो निदानं बहु पुण्यं प्रसवेत्?" आह "बहु भगवन्, बहु सुगत । कल्पकोटिशतसहस्रैरपि तस्य पुण्यस्कन्धस्य पर्यन्तमनुप्राप्तुमशक्यम्" । भगवानामन्त्रयते स्म "अधिमुच्यस्व., देवेन्द्र, त्वयानुगन्तव्यं यः कुलपुत्रो वा कुलदुहिता वेममचिन्त्यविमोक्षनिर्देशस्य धर्मपर्यायमुद्गृह्णीयाद्वाचयेत्पर्यवाप्नुयात्, (सोऽस्माद्) बहु(तरं) पुण्यं प्रसवेत् । तत्कस्य हेतोः? भगवतां बुद्धानां हि बोधिः, देवेन्द्र, धर्मसम्भवा; सा च धर्मपूजायै शक्या, न परं त्वामिषेण (पूज्या) । अनेने पर्यायेण, देवेन्द्र, त्वयैवं वेदितव्यम्" ।
"भूतपूर्व, देवेन्द्र, अतीतेऽध्वन्यसंख्येयैः कल्पैरसंख्येयतरैविपुलैरप्रमेयैरचिन्त्यैस्तेभ्यः परेण परतरेण यदासीत्तेन कालेन तेन समयेन भैषज्यराजो नाम तथागतोऽर्हन्सम्यक्सम्बुद्धो लोक उदपादि विद्याचरणसम्पन्नः सुगतो लोकविदनुत्तरः पुरुषदम्यसारथिः शास्ता देवानां च मनुष्याणां च बुद्धोभगवान्विचारणे कल्पे महाव्यूहायां लोकधातौ । तस्य भैषज्यराजस्य तथागतस्यार्हतः सम्यक्सम्बुद्धस्य विशत्यन्तरकलपानायुष्प्रमाणमभूत् । तस्य षट्त्रिशत्कोटिनयुताः श्रावक(संनिपातो)ऽभूत्द्वादशकोटिनयुता बोधिसत्त्व(संनिपातो)ऽभूत् ।

"तेन खलु पुनः समयेन रत्नच्छत्त्रो नाम राजोदपादि चक्रवर्ती चातुर्द्वीपः सप्तरत्नसमन्वागतः । पुर्ण चास्याभूत्सहस्रं पुत्राणां शूराणां वीराणां वराङ्गरुपिणां परसैन्यप्रमर्दकानां ।

"स रत्नच्छत्त्रो राजा पञ्चान्तरकल्पान्सर्वसुखोपधानैर्भगवन्तं भैषज्यराजं तथागतं सपरिवारं मानयति स्म । तेषु पञ्चान्तरकल्पेष्वतीतेषु, देवेन्द्र, रत्नच्छत्त्रो राजा सहस्रं पुत्रानेतसवोचत्ऽहे, वित्त । अहं तथागतमपूजयं । अत इदानीं यूपमपि पूजयत तथागतम्ऽ । ततस्ते राजकुमाराः पित्रे रत्नच्छत्त्राय राज्ञे साधुकारं दत्त्वा, तस्मै प्रत्यश्रौषुः । ते च सह गणेन तथागतं भैषज्यराजं पञ्चान्तरकल्पान्सर्वसुखोपधानैः सत्करोन्ति स्म ।

"तेषु चन्द्रच्छत्रस्य नाम राजपुत्रस्य रहोगतस्यैवं भवति स्मऽतस्याः पूजाया अन्या विशिष्टतरोदारा पूजा ननु भवतीऽ ति । बुद्धाधिष्ठानेनान्तरीक्षाद्देवा एतदाहुःऽधर्मपूजा हि, सत्पुरुष, सर्वपूजासूत्तमा । स आहऽसा धर्मपूजा किमस्ति?ऽ देवा आहुःऽतस्य, सत्पुरुष, तथागतस्य भैषज्यराजस्य समीपं गत्वा, सा धर्मपूजा किमस्तीति पृच्छ । भगवांस्ते व्याकरिष्यतिऽ ।

"अथ, देवेन्द्र, चन्द्रच्छत्रो राजकुमारो येन भगवान्भैषज्यराजस्तथागतोऽर्हन्सम्यक्संबुद्धस्तेनोपसंक्रान्तः । उपसंक्रम्य, भगवत्पादौ शिरसा वन्दित्वा, एकान्तेऽस्थात् । एकान्तस्थितश्चन्द्रच्छत्रो राजपुत्रो भगवन्तं भैषज्यराजं तथागतमेतदवोचत्ऽधर्मपूजा नाम, भगवन्, सा किमस्ति?ऽ

"स भगवानामन्त्रयते स्मऽकुलपुत्र, धर्मपूजा हि तथागतभाषिता गम्भीरसूत्रान्ताः गम्भीरावभासाः सर्वलोकविप्रत्यनीका दुर्विगाह्या दुर्दृशा दुरवबोधाः सूक्ष्मा निपुणा अतर्कावचराः । (ते सूत्रान्ता) बोधिसत्त्वपिटकान्तर्भूता धारणीसूत्रान्तराजमुद्रामुद्रिता अवैवर्तिक(धर्म) चक्रसंदर्शकाः षट्पारमितासम्भूताः सर्वग्राहापरिगृहीताः । "ऽ(ते सूत्रान्ता) बोधिपक्ष्यधर्मद्समन्वागता बोध्यङ्गनिष्पादनापर्यापन्नाः सत्त्वमहाकरुणावतारणा महामैत्रीसंदर्शकाः सर्वमारदृष्टिगतापगताः प्रतीत्यसमुत्पादसंदर्शकाः ।

"ऽ(धर्मेषु ते सूत्रान्ता) अनात्मका निःसत्त्वा निर्जीवा निष्पुद्गलाः शून्यतानिमित्ताप्रणिहितानभिसंस्कारानुत्पादासम्भवसम्प्रयुक्ताः । (ते) बोधिमण्डं समुदागच्छन्ति धर्मचक्रप्रवर्तकाः । प्रशंसिताऽ (ते) वर्णिता देवनागयक्षगन्धर्वासुरगरुडकिन्नरमहोरगाधिपतिभिः । (सूत्रान्तास्ते) सद्धर्मवंशाऽसना धर्मकोशग्राहका धर्मपूजावरापन्नाः । सर्वार्यजनैः परिगृहीताऽ(ते) सर्वबोधिसत्त्वचर्याः सम्प्रकाशयन्ति भूतार्थधर्मप्रतिसंविदापन्नाः । धर्मसूत्रान्ता अनित्यतादुःखनैरात्म्यशान्ति (निर्देश) नैर्यानिकाः ।

"ऽमात्सर्यदौःशील्यव्यापादकौसीद्यमुषितस्मृतिदुष्प्रज्ञावसाद परप्रवादिकुदृष्टिसर्वालम्बनाभिनिवेशां जहति (ते) सर्वबुद्धस्तोमिताः, संसारपक्षप्रतिपक्षा निर्वाणसुखं सम्प्रकाशयन्ति । ये तादृशसूत्रान्ताः सम्प्रकाशनधारणप्रत्यवेक्षणसद्धर्मसंग्रहाः, सा हि धर्मपूजा नाम ।

"ऽपुनरपरं, कुलपुत्र, धर्मपूजा हि धर्मा(नु)धर्मनिध्यप्तिर्धर्मा(नु) धर्मप्रतिपत्तिः प्रतीत्यसमुत्पादसमादानं; (सा) सर्वान्तग्राहदृष्टिरहिता, अनुत्पादानोपपत्तिक्षान्तिः, नैरात्म्यनिःसत्त्वप्रवेशः, हेतुप्रत्ययो रविरोधोऽविवादोऽकलहः, अहंकारमम(कारा)पगता ।

"ऽ(धर्मपूजा) ह्यर्थप्रतिसरणन्न व्यञ्चनप्रतिसरणम्, ज्ञानप्रतिसरणन्न विज्ञानप्रतिसरणम्, नीतार्थ सूत्रप्रतिसरणन्न नेयार्थसंवृत्यभिनिवेशः, धर्मताप्रतिसरणन्न पुद्गलदृष्ट्युपलब्धिग्रहणाभिनिवेशः; यथाबुद्धधर्ममवबोधः, अनालयप्रवेशः, अलयसमुद्धातः; प्रतीत्यसमुत्पादस्य द्वादशांगे(षु) तद्यथा अविद्यानिरोधाद्यावज्जरामरणशोकपरिदेवदुःखदौर्मनस्योपायासा निरुध्यन्त इत्यक्षयसत्त्वदृष्ट्यभिनिर्हारेणाभिसम्पन्नं सर्वदृष्ट्यदर्शनं चसा हि, कुलपुत्र, अनुत्तरा धर्मपूजा नामऽ ।

"ततस्स राजपुत्रश्चन्द्रच्छत्त्रः, देवेन्द्र, भगवतो भैषज्यराजात्तथागताद्धर्मपूजामेवं श्रुत्वा, अनुलोमिकीं धर्मक्षान्ति प्राप्नोति स्म । सर्ववस्त्रविभूषणेषु तस्मै भगवत उपनामितेषु, एतद्वचनमवोचत्ऽभगवति तथागते परिनिर्वृते, सद्धर्मपरिग्रहपूजनार्थ सद्धर्म परिग्रहीतुं उत्सहे । अधितिष्ठतु मामेवं भगवान्, यथाहं मारपरप्रवादिनो निहत्य, सद्धर्म परिगृह्णीयाम्ऽ ।

"तथागतस्तस्याध्याशयं बुद्ध्वा,ऽपश्चिमकाले पाश्चिमसमये सद्धर्मनगरं पालयिष्यसे रक्षिष्यसि परिग्रहीष्यसीऽ(ति) व्याकरोति स्म ।

"अथ स राजपुत्रश्चन्द्रच्छत्त्रस्तथा तथागतप्रतिष्ठितश्रद्धयागारदनागारिकां प्रव्रजितः कुशले(षु) धर्मे(षू) वीर्यमारभते स्म । आरब्धिवीर्यः स्थित्वा, कुशलेषु धर्मेषु सुप्रतिष्ठितः सोऽचिरेण धारणीगतिगतः पञ्चभिज्ञा उत्पादयति स्म । सोऽनाच्छेद्यप्रतिभानप्रतिलाभी, भगवति भैषज्यराजे तथागते परिनिर्वृते, अभिज्ञाधारणीइवशेन धर्मचक्रं प्रवर्तयति स्म । स भगवान्भैषज्यराजस्तथागतो यथा, तथा दशान्तरकल्पान्(धर्मचक्रम्) अनुप्रवर्तयति स्म ।

"तथा हि, देवेन्द्र, चन्द्रच्छत्त्रस्य भिक्षोः सद्धर्मपरिग्रहाभियोगेन कोटिदशशतं सत्त्वा अनुत्तरसम्यक्संबोधि(मार्ग्) आवैवर्तिका अभूवन् । प्राणिनां चत्वारिशन्नयुतानि श्रावकप्रत्येकबुद्धयाने विनीतान्य्(अभूवन्) । अप्रमाणसत्त्वाः स्वर्गेषूत्पद्यन्ते स्म ।

"मन्येथाः, देवेन्द्र, अन्यः स तेन कालेन तेन समयेन रत्नच्छत्त्रो नाभाभुद्राजा चक्रवर्ती । न खलु पुनस्त्वयैवं द्रष्टव्यं । तत्कस्य हेतोः? अयमेव स रत्नार्चिस्तथागतस्तेन कालेन तेन समयेन रत्नच्छत्त्रो नाम राजा चक्रवर्त्यभूत् । (ये) तस्य रत्नच्छत्त्रस्य राज्ञः पुत्राः सहस्रमभूवन्, ते सन्तीमे वर्तमानस्य भद्रकल्पस्य बोधिसत्त्वाः । अस्मिन्भद्रकल्पे पूर्णबुद्धानां सहस्रमुत्पद्यन्ते । तेषां चत्वारो हिक्रकुच्छन्दादय उत्पन्नपूर्वाः । अवशिष्टा अपि प्रादुर्भविष्यन्तिककुत्सुन्दादयो यावद्रोचं । अन्ते रोचो नाम तथागत उत्पद्यते । "मन्येथाः, देवेन्द्र, अन्यः स तेन कालेन तेन्समयेन चन्द्रच्छत्त्रो नाम राजपुत्रोऽभूत्तस्य भगवतो भैषज्यराजस्य तथागतस्य सद्धर्मपरिग्राहकः । न खलु पुनस्त्वयैवं द्रष्टव्यं । तत्कस्य हेतोः? अहमेव स, देवेन्द्र, तेन कालेन तेन समयेन चन्द्रच्छत्त्रो नाम राजपुत्रोऽभूवं ।

"अनेन पर्यायेण, देवेन्द्र, वेद्यम् यावत्तथागतपूजाः, (तासु) धर्मपूजा ह्युत्तमा नाम, वरा परमा वराग्रा प्रणीतोत्तरानुत्तरेति । तस्मात्तर्हि, देवेन्द्र, नामिषेण धर्मपूजया पूजा मे कर्तव्या । नामिषेण सत्कारो मे कर्तव्यः, धर्मसत्कात्रेण मानयितव्यम्" ।

अथ भगवान्मैत्रेयं बोधिसत्त्वम्महासत्त्वमामन्त्रयते स्म "इमामहं मैत्रेयासंख्येयकल्पकोटिसमुदानीतामनुत्तरां सम्यक्संबोधि त्वयि परीन्दामि, यथा पश्चिमे काले पश्चिमे समयेऽयमेवंरूपो धर्मपर्यायस्त्वदधिष्ठानेन परिगृहीतो जम्बुद्वीपे वर्धेत न चान्तर्धीयेत, तत्कस्य हेतोः? अनागतेऽध्वनि, मैत्रेय, (ये)ऽवरिपितकुशलमूलाः कुलपुत्रकुलदुहितृदेव नागयक्षगन्धर्वासुरा अनुत्तरसम्यक्संबोधिसम्प्रस्थिताः, त इमं धर्मपर्यायन्न श्रुत्वा, ध्वंसिष्यन्ते । एवंरुपं सूत्रान्तं श्रुत्वा, प्रहृष्टाः श्रद्धां प्रतिलप्स्यन्ते शिरसा चा (भिवन्द्य, तं) ग्रहीष्यन्ति । तेषां कुलपुत्रकुलदुहितॄणां रक्षणार्थाय, मैत्रेय, तेन कालेन त्वयायमीदृशः सूत्रान्तः स्फ़रणीयः ।

"इमे हि, मैत्रेय, बोधिसत्त्वानां द्वे मुद्रे । कतमे द्वे? नानापदव्यञ्जनप्रसन्नस्य मुद्रा गम्भीरेण धर्मनयेनात्रस्तस्य यथाभूतं प्रतिपन्नकस्य मुद्रा च । ते, मैत्रेय, बोधिसत्त्वानां द्वे मुद्रे । ततो ये बोधिसत्त्वा नानापदव्यञ्जनप्रसन्नास्तत्पराः, ते ह्यादिकर्मिका अचिरब्रह्मचारिणो वेदितव्याः । ये, मैत्रेय, बोधिसत्त्वा अस्य गम्भीरस्यानुपलिप्तस्य सूत्रान्तस्य यमकव्यत्यस्ताहारस्य ग्रन्थं वा पटलं वा पठन्ति शृणवन्त्यधिमुच्यन्ते देशयन्ति, (ते) हि चिरब्रह्मचारिणो वेदितव्याः ।

"आदिकर्मिकास्ततः, मैत्रेय, बोधिसत्त्वा द्वाभ्यां कारणाभ्यामात्मानं व्रणयन्ति गम्भीरे च धर्मे न निध्यायन्ति । कतमे द्वे? अश्रुतपूर्व गम्भीरं सूत्रान्तं श्रुत्वा, त्रस्ताश्च संशयिता नानुमोदन्ते । स एवमस्माभिरश्रुतपूर्वः कुत आगत इति (पृच्छन्तस्तं) त्यजन्ति । ये कुलपुत्रा गम्भीरं सूत्रान्तमुद्गृह्णन्ति गम्भीरधर्मभाजनभूताश्च गम्भीरं धर्म देशयन्ति, तेभ्यो न सेवन्ति चासमागमा न पर्युपासते तां च न सत्कुर्वन्ति । अन्ततस्तेष्ववर्णमपि निश्चारयन्ति । ताभ्यां कारणाभ्यामादिकर्मिकबोधिसत्त्वा आत्मानं व्रणयन्ति गम्भीरे च धर्मे नावकल्पयन्ति ।

"ताभ्यां द्वाभ्यां कारणाभ्यां गम्भीराधिमुक्तिक बोधिसत्त्वा आत्मानं व्रणयन्ति चानुत्पत्तिकधर्मक्षान्तिन्न लभन्ते । कतमे द्वे? आदिकर्मिकानचिरचरितान्बोधिसत्त्वानवमन्यन्ते विमानयन्ति, न (समा)दापयन्ति न (वि)वरन्ति न देशयन्ति । गम्भीरे (धर्मे)ऽल्पश्रद्धाः शिक्षान्न मानयन्ति, लोकस्य चामिषदानेन न तु धर्मदानेन सत्त्वानुपकुर्वन्ति ।
"मैत्रेय, गम्भीरधिमुक्तिकबोधिसत्त्वा आभ्यां कारणाभ्यामात्मानं व्रणयन्ति चानुत्पत्तिकधर्मक्षान्ति शीघ्रन्न लभन्ते" । एवमामन्त्रयते स्म ।
भगवन्तं बोधिसत्त्वो मैत्रेय एतदवोचत् "भगवता यथा सुभाषितम्, भगवन्, (तद्) आश्चर्यं । साधु, भगवन् । अद्याग्रेण, भगवन्, इमानत्ययान्(वि)वर्जयेयं । (या) तथागतेनासंख्येयकोटिनयुतशतसहस्रेभ्यः कल्पेभ्योऽनुत्तरसम्यक्संबोधिः समुदानीता, इमामारक्षिष्यामि धारयिष्यामि ।
"(ये)ऽनागते (ऽध्वनि) कुलपुत्रा वा कुलदुहितरो वा भाजनभूताः, तेभ्य ईदृशं सूत्रान्तं हस्तगतं करिष्यामि । (तेषां) स्मृतिमुपसंहरिष्यामि ययेममेवंरूपं सुत्रान्तं । अधिमुच्योद्ग्रहीष्यन्ति धारयिष्यन्ति पर्पवाप्स्यन्ति विवेशयन्ति लिखिष्यन्ति परेभ्यश्च विस्तरेण सम्प्रकाशयिष्यन्ति । तानहं, भगवन्, प्रस्थापयिष्यामि । (ये) भगवन्, तेन समयेनास्मिनेवंरूपे सूत्रान्तेऽधिमुच्यन्तेऽभिनिविशन्ति च, ते हि, भगवन्, मैत्रेयस्य बोधिसत्त्वस्याधिष्ठानेनाधिष्ठिता वेदितव्याः" ।

अथ भगवान्मैत्रेयाय बोधिसत्त्वाय साधुकारमदात् "साधु, मैत्रेय, साधु । सुभाषितं तत्ते वाक्यं । तथागतोऽपि तत्ते सुभाषितमनुमोदयति" ।

ततस्(सर्वे) ते बोधिसत्त्वा एकनिर्घोषिणैतद्वाक्यमवोचन् "वयमपि, भगवन्, तथागते परिनिर्वृते, नानाबुद्धक्षेत्रेभ्य आगतास्तथागतस्य बुद्धस्येमां बोधिमुपबृंहयिष्यामः । तेऽपि कुलपुत्रा अधिमोक्षयिष्यन्ति" ।

अथ भगवन्तं चतुर्महाराजिका (देवा) अप्येतदवोचन् "येषु येषु, भगवन्, ग्रामनगरमिगमराष्ट्रराजधानीष्वेवंरुपो धर्मपर्यायश्चरितो देशितः सम्प्रकाशितः, तेषु तेषु, भगवन्, वयमपि चतुर्महाराजिका (देवाः) सबलवाहनपरिवारा धर्मश्रवणार्थं एष्यामः । तेषां धर्मभाणकानां आ योजनापरिसामन्तकाद्रक्षां करिष्यामो यथा न कश्चित्तेषां धर्मभाणकानामवतारप्रेक्ष्यवतारगवेष्यवतारं लप्स्यते" ।

अथ भगवानायुष्मन्तमानन्दमेतदवोचत् "उद्गृह्णीष्व त्वम्, आनन्द, इमं धर्मपर्यायं, धारय परेषां च विस्तरेण सम्प्रकाशय" । आह "अस्मिन्धर्मपर्याय उद्गृहीते, को नामयं भगवन्धर्मपर्यायः, कथं चैनं धारयामि?"
भगवानामन्त्रयते स्म "तस्मादानन्द, इमं धर्मपर्यायंऽविमलकीर्तिनिर्देशंऽ वाऽयमकव्यत्यस्ताभिनिर्हारंऽ वाप्य्ऽअचिन्त्यविमोक्षपरिवर्तन्नामऽ धर्मपर्यायं धारय" ।
इदमवोचद्भगवान् । आत्तमना लिच्छविर्विमलकीर्तिर्मजुश्रीश्च कुमारभूतः स चायुष्मानानन्दस्ते च बोधिसत्त्वाते च महाश्रावकाः सा च सर्वावती पर्षत्सदेवमानुषासुर गन्धर्वश्च लोको भगवतो भाषितमभ्यनन्दन्निति ।

पूर्वयोगस्य सद्धर्मपरीनन्दनायाश्च परिवर्तो नाम द्वादशः ।

विमलकीर्तिनिर्देशो नाम महायानसूत्रं समाप्तं ।